Serving JinShasan
049553
gyanmandir@kobatirth.org

॥ श्रीजिनाय नमः ॥

# ॥ अथ श्रीधम्मिलचरित्रं भाषांतरोपेतं प्रारभ्यते ॥

( द्वितीयो भागः )

( मूलकर्त्ता—श्रीजयशेखरसूरिः )

भाषांतरकर्त्ता— श्रावक मनसुखलाल हीरालाल हंसराज. ( जामनगरवाळा )

हस्तायातस्वनाशेन । घातेनेव यमस्य सः ॥ दोदूयमानोऽनुदिनं । व्यधात्तत्रापि रोदनं ॥९९॥
ग्रामाधिपस्ततस्तस्मै । शालेयं कृपया ददौ ॥ धेनुं च रोहिणीं नाम्ना । परार्था हि सतां श्रियः ॥

तथा त्यां पण ते हाथ आवेलां धनना नाशथी जाणे यमे पोताने मारी नाख्यो होय नहि तेम हमेशां दुभातो थको रोवा लाग्यो ॥ ९९ ॥ त्यारे ते गामना ठाकोरे तेने ( दुःखी जोइ ) एक खेतर आप्युं तथा एक रोहिणी नामनी गाय आपी, केमके सज्जनोनी लक्ष्मी परोपमाटे होय छे. ॥ १०० ॥ एवामां वनना दावानलने नाश करनारो ज्यारे वरसाद आव्यो त्या-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

१७४

१००॥ अन्यदा वनदावाग्नि—दाहदुहि घनागमे ॥ ...प्रे विप्रो नवप्रौढि—शाली शालीनुवाप
ः ॥ १ ॥ इतश्चासादिते व्योम—मणिग्रहणपर्वणि ॥ धनलाभाशया सर्वे । माद्यंतिस्म द्विजात-
यः ॥ २ ॥ शालिर्विपच्यते याव—त्तावत्पर्वणि पूषणः ॥ गत्वा ग्रामांतरं कंचि—द्धनं संचिनो-
म्यहं ॥ ३ ॥ ध्यात्वेति रक्ष्यं शालेयं । पाल्येयं गुर्विणी च गौः ॥ युवाभ्यामिति पुत्रौ सो—ऽनु-
शिष्य प्रास्थित द्विजः ॥ ४ ॥ द्विजे दूरं गते तस्मिन् । दारिद्र्य इव देहिनि ॥ श्रियमिच्छत्कलापा-
त्रं । तत्रागान्नटपेटकं ॥ ५ ॥ नटैः स्वकलया तत्र । तथारंजि चिरं जनः ॥ स्वयं स्पृहाधिकं तेभ्यो

---

रे नवी आबादीथी खुश थयेला ते ब्राह्मणे ते खेतरमां डांगर वावी. ॥१॥ एवामां सूर्यग्रहणनुं पर्व आव्याथी धनप्राप्तिनी आशाथी सर्व ब्राह्मणो हर्षघेला बनी गया. ॥ २ ॥ जेटलामां आ डांगर पाके तेटलामां आ सूर्यग्रहणना पर्वमां कोइक गाम जइने थोडुंक धन एकठुं करुं. ॥ ३ ॥ एम विचारी ते ब्राह्मण तमारे आ डांगरना खेतरनुं रक्षण करवुं तथा आ गर्भिणी गायने पण पाळवी, एम पोताना बे संतानोने शिखामण आपी त्यांथी चालतो थयो. ॥ ४ ॥ मूर्तिवंत दारिद्र्यनीपेठे ते ब्राह्मण जेटलामां दूर गयो तेटलामां धननी इच्छावाळुं अने कलावंत एवुं एक नटोनुं टोळुं ते

P.P. Ac. ...ratnasuri M.S.
Jun Gun Aaradhak Trust

। यथा वित्तमदत्त सः ॥ ६ ॥ सोमदेवस्तदालोक्य । व्यमृशत्कृशधीर्हृदि ॥ अहो एषां कला की-
दृग् । अहो लोकः कलाप्रियः ॥ ७ ॥ क्वापि किंचिन्न लभते । याचमानोऽपि मे पिता ॥ याञ्चां
विना ह्यमी प्रापु—रपत्तापहरं धनं ॥८॥ धिग् ब्राह्मण्यं शुक्लवृत्त्या । कर्णपंचकपूरकं ॥ विद्यास्थाना-
न्यपि वृथा । कंठशोषकराणि धिक् ॥ ९ ॥ साम्यमेति श्रिया हीनो । नरो निर्वाणवह्निना ॥ यथा

गाममां आव्युं. ॥ ५ ॥ ते नटोए पोतानी कळाथी त्यांना लोकोने एवा तो खुशी कर्या के जेथी तेओए तेओने पोतानीमेळेज इच्छाथी पण अधिक धन आप्युं. ॥ ६ ॥ ते जोइने तुच्छबुद्धि सोमदेव मनमां विचारवा लाग्यो के, अहो! आ नटोनी केवी कला छे! तथा लोको पण कलाने चाहनारा छे. ॥ ७ ॥ अने मारो बाप तो भीखी भीखीने थाक्यो, तो पण तेने क्यांय कइं मळतुं नथी, अने आ नटोने तो माग्याविनाज दारिद्र्यरूपी तापने हरनारुं धन मळी गयुं! ॥ ८ ॥ माटे आ ब्राह्मणपणानेज धिक्कार छे, के जेमां भीख मागीने उदरपूरण करवी पडे छे, तेमज विद्याशाळाओ पण फोकट कंठशोष करनारी छे, माटे तेने पण धिक्कार छे. ॥ ९ ॥ निर्धन माणस ठरी गयेला अग्निसरखो एटले राखना मेळमां छे, माटे गमे तेम करीने पण धन मेळववुं, तेमा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तथा वा श्रीरज्यां । जातिकर्मकुलैरलं ॥ १० ॥ पद्मस्य पंकयोनित्वं । गोपालत्वं मुरद्विषः ॥ कलं
कित्वं विधोर्लक्ष्मी—वतः कोऽत्र विगायति ॥ ११ ॥
निश्चित्येति कुलाशंका—मपास्य मिलतिस्म सः ॥ नटानां धनलोभेन । स हि नामांतरं मधु ॥१२॥
यूनैकेन स्वसारेण । स्वसा तस्य स्वसात्कृता ॥ फलं सुसिक्ता वल्लीवा—ऽचिराद्गर्भमधारयत ॥१३॥
अशोध्यमानः केनापि । कर्मौघैरसुमानिव ॥ उदारः शालिकेदारः । सर्वतश्छादितस्तृणैः ॥ १४ ॥

---

टे जात कर्म के कुलनी परवा करवानी नथी. ॥ १० ॥ लक्ष्मीवान कमळना कादवथी थयेला ज-न्मने, विष्णुना गोवाळीयापणाने तथा चंद्रना कलंकीपणाने कोण अहिं वगोवी शके छे? ॥११॥
एम निश्चय करीने कुलाचारनी शंका छोडीने ते सोमदेव तो धनना लोभथी ते नटोसा-थे मळी गयो, केमके ते धन नामफेर मधलारसरखुं छे. ॥ १२ ॥ तेनी बहेन सोमशर्माने कोइ-क धनवान युवाने पोताने स्वाधीन करी, तथा सारी रीते सींचायेली वेलडी जेम फळने तेम तेणीए तुरत गर्भने धारण कर्यो. ॥ १३ ॥ वळी कोइए पण नहि शोध्याथी कर्मोना समूहोथी जेम जीव तेम ते फालेलुं डांगरनुं सघळुं खेतर घासथी छवाइ गयुं. ॥ १४ ॥ तुरतमां वीयानारी

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अचिरादेव वल्लीव । पालनं पोषणं विना ॥ व्यशुष्यद्रोहिणी धेनु-रपि दुष्टफलोदया ॥ १५ ॥ ई-
षल्लब्धधनः सोऽथा—गतो विप्रो निरैक्षत ॥ गृहमेकांतं निःक्रांत-पात्रनाटकसंनिभं ॥ १६ ॥ कि-
मकस्मादिदं जात—मिति संभ्रांतचेतसः ॥ तस्य कोऽप्यलिखोदंत—दीपकं श्लोकमब्रवीत् ॥ १७ ॥
सोमदेवो नटो जातः । सोमशर्मा च गुर्विणी ॥ शालिवप्रस्तृणैश्छन्नो । न प्रसूता च रोहिणी ॥
॥ १८ ॥ तत् श्रुत्वा जन्मतः स्वीय-वृत्तस्मरणदुर्मनाः ॥ अशक्तः सद्मनि स्थातुं । वनं गत्वाऽरुदच्चि-

---

रोहिणी गाय पण पालणपोषणविना वेलडीनीपेठे तुरत सूकाइ गइ. ॥ १५ ॥ पछी थोडुंक धन मेळवी घेर आवेला ते ब्राह्मणे जेमांथी पात्रो चाल्या गयां छे एवी नाटकशाळासरखुं उजड पडेलुं पोतानुं घर जोयुं. ॥ १६ ॥ अरे! आ अचानक शुं थइ गयुं! एवी रीते मनमां गभराट पामेला ते ब्राह्मणने कोइए तेनुं सघळुं स्वरूप जणावनारो एक श्लोक कह्यो के, ॥ १७ ॥ सोमदेव तो नट थइ गयो, अने सोमशर्मा गर्भवंती छे, डांगरनुं खेतर घासथी छवाइ गयुं छे, अने रोहिणी गाय वीयाइ नथी. ॥ १८ ॥ ते सांभळी छेक जन्मथी पोतानी स्थिति याद आववाथी ते शिव ब्राह्मण मनमां घणोज खेद पामी घरमां नहि रही शकवाथी वनमां जइ रडवा लाग्यो. ॥ १९ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वः ॥ १९ ॥ प्रम्लानवदनं दुःख—सदनं वीक्ष्य सकृपः ॥ ऋषिः कोऽपि किमेवं भो । रोदिषीति तमालपत् ॥ २० ॥ स्ववृत्तेऽभिहिते विप्रे—णाधिव्याधिमहौषधीं ॥ वाचमूचे मुनिर्भद्र । मा रोदीर्धेहि धीरतां ॥ २१ ॥ कस्य लक्ष्मी सुताः कस्य । कस्य वेश्मेति चिंतय ॥ नदेति याति चात्माय—मेक एव भवाद्भवं ॥ २२ ॥ स्वदृक्निकूणनाद्व्योम्नि । द्विचंद्रीं वीक्ष्यते यथा ॥ तत्तत्साम्यं दधत्यात्मा । स्वमनःकल्पनात्तथा ॥ २३ ॥ विना जिनाधिपं सर्वे-गिनः स्वार्थैकलग्नाः ॥ यस्तेषु प्रे-

---

एवी रीते अत्यंत शोकातुर चहेरावाळा तथा दुःखना घरसरखा ते ब्राह्मणने त्यां जोइने कोइक मुनिए कह्युं के, अरे तुं शामाटे रडे छे? ॥ २० ॥ त्यारे ते ब्राह्मणे पोतानुं वृत्तांत कह्याबाद मुनि तेनी आधिव्याधि दूर करवाने महान औषधीसरखी वाणी बोल्या के, हे भद्र! तुं रड नहि अने धैर्य राख? ॥ २१ ॥ कोनी लक्ष्मी? कोना पुत्रो? अने कोनुं घर? ए सघळुं तुं विचार? आ आत्मा तो एकलोज एक भवमांथी बीजा भवमां जाय छे. ॥ २२ ॥ पोतानी आंखो संकोचवाथी आकाशमां जेम बे चंद्रो देखाय छे, तेम पोताना मननी कल्पनाथी आत्मा ते ते तुल्यपणाने धारण करे छे. ॥ २३ ॥ जिनेश्वरविना सर्वे प्राणीओ फक्त स्वार्थमांज लीन थयेला छे, माटे

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मसंकल्पः । स कल्पद्रुभ्रमः स्नुहौ ॥ २४ ॥ स्वमित्यागृह्णते काम-ग्रहिला महिलादि यत् ॥ गब्-
द्भवांतरं पृच्छ-त्यपि स्वैरीव तन्नतु ॥ २५ ॥ धिगात्माकर्षं कुर्वेऽहं । कर्त्तास्मीदमितीच्छया ॥ धत्ते त्रै-
कालिकीं व्याप्तिं । विधेर्वाम्यं विदन्नपि ॥ २६ ॥ दाढ्यं दर्शयतां धत्तां । धियं धाम्ना विचेष्टतां ॥
जनः पुनः फले याति । दैवमेव प्रमाणतां ॥ २७ ॥ तथाहि—

विंध्याटवीषु गौरांगो । व्यहार्षीत्कोऽपि कुंजरः ॥ कुंजरस्तरुपत्रौघा-स्तरणं लंघयन् सुखं ॥२८॥

---

तेउमां जे प्रेमनो संकल्प करवो ते थोरमां कल्पवृक्षनी भ्रांति करवा जेवुं छे. ॥ २४ ॥ आ मारुं
छे एम विचारीने कामातुर पुरुषो स्त्रीआदिकने जे ग्रहण करे छे, ते भवांतरमां जाताथका स्व-
च्छाचारीनीपेठे रजा पण लेता नथी. ॥ २५ ॥ धिक्कार छे के आत्मा विधातानुं विपरीतपणुं जाण्या
छतां एम माने छे के में आ कर्युं, हुं करुं छुं तथा हुं करीश एवी इच्छाथी ते त्रिकालवाळी व्या-
प्ति धारण करे छे. ॥ २६ ॥ भले माणस म्हापण देखाडे, बुद्धि धारण करे, तथा प्रतापपूर्वक
चेष्टा करे, तो पण फलसमये तो दैवज प्रमाणभूत थाय छे. ॥ २७ ॥ तेमाटे उदाहरण कहे छे—
विंध्याचलना वनमां कोइक श्वेत शरीरवाळो तथा पृथ्वीपर पमेलां वृक्षनां जीर्ण पत्रोना स-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कपोलपालिमालीना । यस्य भृंगाः सहस्रशः ।। रेजिरेऽजस्रं संवाहि-दानांभोबुद्बुदा इव ।।२९।।
निशांते जाग्रता येनो-दस्तो हस्तो वनेचरैः ।। दृष्टो नभस्तरोस्तारा-पुष्पाण्याप्तुमिवोच्छ्रितः ।।३०।।
कुंभांतर्यस्य यो मुक्ता-धनं कृपणवद्दधन् ।। भाग्याधिकस्य कस्यापि । कृते वाहिकतां गतः ।।३१।।
किमयं पादपः फुल्लः । किं वा सौधं वनश्रियः ।। यं स्थानस्थं निरीक्ष्येति । क्षणं मूढाः खगा अपि
।। ३२ ।। सोऽन्यदांतर्नदं कुंजा-च्चिखेलिषुरहर्मुखे ।। लीलालसगतिः सौधा-दिव श्रीमान् विनिर्य-

---

मूढनुं बीछानुं करी सुखे रहेनारो हाथी वसतो हतो. ।। २८ ।। तेना गंडस्थलपर चोंटेला हजारो गमे भमरा हमेशां झरनारा मदरूपी जलना जाणे परपोटा होय नहि तेम शोभता हता. ।। ।। २९ ।। परोढीये जागेला एवा ते हाथीए पोतानी उंची करेली सुंढ जाणे आकाशरूपी वृक्षना तारारूपी पुष्पोने लेवामाटे धारण करी होय नहि तेम शोभती हती. ।। ३० ।। वळी ते कृपणनीपेठे कुंभस्थलनी अंदर मोतीरूपी धनने धारण करतोथको कोइक भाग्यवानना वाहनपणाने प्राप्त थयो हतो. ।। ३१ ।। तेने कोइ जगोए उभेलो जोइने शुं आ कोइ वृक्ष प्रफुल्लित थयुं छे! अथवा आ वनलक्ष्मीनो महेल छे! एम विचारी विद्याधरो ( पक्षिओ ) पण मूढ थइ जता

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यौ ॥ ३३ ॥ इतश्च कश्चन व्याध—श्चापारोपितसायकः ॥ तत्राजगाम स्वग्रामा—द्वन्यजंतुजिघांसया ॥ ३४ ॥ सोऽद्राक्षीद्दीव्य खेलंतं । सिंधुरं सिंधुरोधसि ॥ दिष्ट्या दृष्टिपथं प्राप्तो । ममायं शकुनेरितः ॥ ३५ ॥ हतेऽस्मिन् भद्रजातीये । मुक्तालाभो मम ध्रुवः ॥ अहो भाग्यभराल्लक्ष्मी—रद्यायाता स्वयंवरा ॥ ३६ ॥ ध्यात्वेति लघुहस्तोऽसौ । विषाक्तं संदधे शरं ॥ स ह्यद्रिरिव दुर्भेदो—

हता. ॥ ३२ ॥ एक दिवसे परोढीये ते नदीनी अंदर क्रीडा करवानी इच्छाथी धनवान जेम पोताना महेलमांथी तेम धीमी गतिथी जाळीमांथी बहार निकल्यो. ॥ ३३ ॥ एवामां धनुष्यपर बाण चडावीने कोइक पारधि पोताना गाममांथी त्यां वनवासी पशुओने मारवानी इच्छाथी आव्यो. ॥ ॥ ३४ ॥ ते त्यां नदीकिनारे ते हाथीने क्रीडा करतो जोइने खुशीथी विचारवा लाग्यो के अहो! आज तो सारुं थयुं के शुभ शकुनने प्रतापे मने आ हाथी नजरे पड्यो छे. ॥ ३५ ॥ खरेखर आ भद्रजातिना हाथीने मारवाथी मने मोतीओनो लाभ थशे, अहो! आजे तो भाग्यने लीधे मने लक्ष्मी पोतानी मेळेज वरवा आवेली छे. ॥ ३६ ॥ एम विचारीने हाथचालाकीथी तेणे फेरी बाण सांध्युं, केमके ते हाथी पर्वतनीमाफक बीजां घणां बाणोवडे करीने पण मरी शके

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ऽनल्पैरप्यपरैः शरैः ॥ ३७ ॥ विहितालीढसंस्थानः । स यत्नान्मुमुचे शरं ॥ अपश्यन्निजदष्टित्वात् ।
पादपृष्ठस्थितं बिलं ॥ ३८ ॥ पिपासुः पवनं प्रात—र्बिलाद्व्यालो विनिर्गतः ॥ तं ददंश च हिंस्राः
स्युः । खलवत्खलघातिनः ॥ ३९ ॥ विद्धो व्याधेषुणा नागो । नगश्छिन्न इवापतत् ॥ व्याधोऽपि
फणिना दष्टः । प्राणैस्त्यक्तावुभावपि ॥ ४० ॥ व्याधेन पतता पृथ्व्यां । विषव्याकुलवर्ष्मणा ॥ क्षु-
ण्णः शिलातलेनेव । सद्यः सर्पो व्यपद्यत ॥ ४१ ॥ कोऽपि विद्याधरो व्योम्ना । व्रजन् वीक्ष्य तदद्-

---

तेवो नहोतो. ॥ ३७ ॥ पछी तेणे स्थिर थइने यत्नपूर्वक बाण मार्युं, परंतु ते वखते तेनी दृष्टि
हाथी तरफ होवाथी पग पाछळ रहेलुं बिल तेणे जोयुं नहि. ॥ ३८ ॥ एवामां प्रभाते पवन पी-
वानी इछाथी ते सर्प बिलमांथी बहार निकळ्यो, अने तेने डंख्यो, केमके हिंसक प्राणीओ खल-
नीपेठे छलथी घात करनारा होय छे. ॥ ३९ ॥ हवे ते पाराधिना बाणथी वींधायेलो ते हाथी
कपायेला पर्वतनीपेठे पड्यो, अने सर्पे डंखेलो ते पाराधि पण पड्यो, अने तेओ बन्ने प्राणरहि-
त थया. ॥ ४० ॥ विषथी व्याकुल शरीरवाळा तथा शिलानीपेठे पृथ्वीपर पडता ते पाराधिए च-
गदेलो सर्प पण तुरत मरण पाम्यो. ॥ ४१ ॥ ते वखते आकाशमार्गे चालतो कोइक विद्याधर

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

स्तुतं ॥ मूर्द्धानं धूनयामास । श्लोकमेकं पपाठ च ॥ ४२ ॥ अन्नदि॰नस्य हृद्यन्य—द्व्याधस्यान्यत्पुनर्हृदि ॥ अहेश्चान्यद्विधिस्त्वन्य—देव चक्रे तदस्य धिक् ॥ ४३ ॥ उदंतं दंतिनः श्रुत्वा । सौम्य धर्मे मतिं कुरु ॥ विधातुर्विश्ववैलोम्यं । विद्वन् किमनुतप्यसे ॥ ४४ ॥ चेतितो मुनिना चेति । शिवः श्रीस्त्रीपराङ्मुखः ॥ आददे चरणं युक्तं । तद्बलेन ययौ शिवं ॥ ४५ ॥ आकर्ण्य शिवविप्रस्य प्राणनाथ कथामिमां ॥ विद्धि दैवस्य वैवश्यं । दुर्बोधं सुधियामपि ॥ ४६ ॥ जंपती एवमन्योऽन्य—

---

ते आश्चर्य जोइने पोतानुं मस्तक धुणावी एक श्लोक बोल्यो के, ॥ ४२ ॥ हाथीना मनमां कइं हतुं, अने पाराधिना हृदयमां वळी तेथी बीजुंज हतुं, सर्पना हृदयमां तेथी पण अन्य हतुं, अने विधाताए तो वळी तेथी पण उलटुंज करी दीधुं, माटे तेने धिक्कार छे. ॥ ४३ ॥ माटे हे सौम्यद्विज! एवी रीतनुं हाथीनुं वृत्तांत सांभळीने तुं धर्ममां बुद्धि कर? वळी हे विद्वान्! विधातानुं तो (जगतमां) विपरीत आचरण छे, माटे तुं शामाटे खेद करे छे? ॥ ४४ ॥ एवी रीते मुनिए प्रतिबोध आप्याथी लक्ष्मी अने स्त्रीथी विरक्त थयेला ते ब्राह्मणे चरण एटले चारित्र लीधुं, अने तेना बळथी ते मोक्षे गयो ए युक्तज छे. ॥ ४५ ॥ माटे हे प्राणनाथ! एवी रीतनी आ शिवब्रा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कथाव्याजेन संततं ॥ तौ किंचन मनोदुःखं । निरवासयतां बहिः ॥ ४७ ॥ करोति यद् घुणः का-
ष्टे । दुर्गात्रो यच्च चिर्भटे ॥ त्वग्मात्रसारे तद्देहे । पुत्रदुःखं चकार तत ॥ ४८ ॥ नित्यपीडाप्रदा-
त्सुत—वियोगात्क्षणिकव्यथं ॥ दारुणं बहुमेनाते । दारणं क्रकचेन तौ ॥ ४९ ॥ दीप्ते विरसचि-
त्याया—मपत्यविरहानले ॥ तयोः शुष्केण वपुषा । विदधे कार्यमेध्मनः ॥ ५० ॥ नित्यश्रावेव
तरिनी । स्फुटनालेव कूपिका ॥ अश्रुश्रावा सदैवाभूद् । दृष्टिर्दुःखार्त्तयोस्तयोः ॥ ५१ ॥ गत्यागत्या-

---

ह्मणनी कथा सांभळीने बुद्धिवानोने पण अगम्य एवुं आपे कर्मनुं विपरीतपणुं जाणवुं. ॥ ४६ ॥
एवी रीते ते दंपती हमेशां परस्पर कथाना मिषथी पोताना मननुं दुःख थोडुं थोडुं बहार कहाड-
वा लाग्या. ॥ ४७ ॥ काष्टनी अंदर रहेलो घुण जे कार्य करे, तथा चीभडामां रहेलो कीडो जे
काम करे, तेवुं काम चर्ममात्रसारवाळां तेउनां शरीरमां पुत्रसंबंधि दुःखे कर्युं. ॥ ४८ ॥ हमेशां
पीडा आपनारा पुत्रना वियोग करतां क्षणिक दुःखवाळुं अने भयंकर एवुं पोताने करवतथी क-
पावुं तेउ सारुं मानवा लाग्या. ॥ ४९ ॥ बेचेनीरूपी चितामां पुत्रविरहरूपी अग्नि बळते छते ते-
उनां शुष्क शरीरे बळतणनुं कार्य कर्युं. ॥ ५० ॥ दुःखथी पीडायेला एवा तेउ बन्नेनां नेत्रो ह-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दिकं कर्म । यव्व्यधत्तां तदादि तौ ॥ तत्सर्वं पूर्वसंस्कारा—न्न तु चैतन्यपाटवात् ॥ ५२ ॥ तावधार-
यतां प्राणा—नपि दुःखकदर्थितान् ॥ आयुःकर्मोपरोधेन । न तु जीविततृष्णया ॥ ५३ ॥ एह्ये-
हि देहि देहि सौ—हित्यं वत्सल धम्मिल ॥ स्वप्नेऽपीति प्रलपंतौ । तौ व्यनिद्रयतां न कं ॥ ५४ ॥
एवं काले व्रजत्यात्मा । तयोः कायममुंचत ॥ को वा सोपप्लवं स्थानं । न मुंचति सचेतनः ॥ ५५ ॥

मेरु वहेनारी नदीनीपेठे, तथा फुटेली सरवाणीवाळी कुइनीपेठे हमेशां आंसुउने ऋरनारी थइ.
॥ ५१ ॥ वळी त्यारथी तेउ बन्ने जे गमनागमनादिकनुं कार्य करता हता, ते सघळुं तेउ पूर्वना
संस्कारथीज करता हता, परंतु सावध मनथी करता नहोता. ॥ ५२ ॥ वळी तेउ दुःखथी कंगाळे-
ला ( पोताना ) प्राणोने पण फक्त आयुकर्मना उपरोधथीज धारण करता हता, परंतु जीववानी
अभिलाषाथी धारण करता नहोता. ॥ ५३ ॥ हे पुत्र धम्मिल तुं आव आव? अने अमोने आ-
नंद आप? एवी रीते स्वप्नमां पण बबडता एवा तेउ बन्ने कोने निद्रारहित न करवा लाग्या? ॥
॥ ५४ ॥ एवी रीते केटलोक काल वीत्याबाद तेउना आत्माए शरीर त्यज्युं. केमके कयो बुद्धि-
वान माणस उपद्रववाळुं स्थान छोडतो नथी? ॥ ५५ ॥

P.P. Ac. Gunratnasuri M.S.		Jun Gun Aaradhak Trust

विपन्नयोः श्वशुरयो-र्गते परिजनेऽखिले ॥ गेहगह्वर एकैव । सिंहीवास्थाद्यशोमतिः ॥ ५६ ॥
निरुध्य बाढं हृदय-वार्यां मीनध्वजं गजं ॥ सा भर्तृशय्यामर्यादां । वार्धिवेलेव नाभिनत् ॥ ५७ ॥
सवितर्यस्तमाप्तेऽपि । धम्मिल्लस्तां न कामिनीं ॥ भृशं मुक्तामपि जहौ । रसी भृंग इवाब्जिनीं ॥
॥ ५८ ॥ कलाकेलिकलाकेलि—क्रीडितस्य पणस्त्रिया ॥ आहरैतनवत्तस्या—ऽतीये द्वादशवत्सरी
॥ ५९ ॥ पणस्त्रियाप्रणाल्येवा—कृष्यमाणं शनैः शनैः ॥ कुंडस्येव पयस्तस्य । धनमक्षीयताखिलं

---

एवी रीते सासुससराना मरणबाद सघळो परिवार पण चाल्यो जवाथी यशोमती पोताना ते घररूपी गुफामां सिंहणनीपेठे एकलीज रहेवा लागी. ॥ ५६ ॥ वळी तेणीए पोताना हृदयरूपी सांकळमां कामदेवरूपी हाथीने दृढ बांधीने भर्तारनी शय्यानी मर्यादा समुद्रनी वीरनीपेठे लोपी नहि. ॥ ५७ ॥ हवे एवी रीते माबापरूपी सूर्य आथम्यापछी पण रसलोलुप भमरो जेम कमलिनीने तेम अत्यंत भोगवेली एवी पण ते गणिकाने ते धम्मिले तजी नहि. ॥ ५८ ॥ वेश्याए पोतानी मनोहर क्रीडावाळी कलानी क्रीडाथी वश करेला ते धम्मिलना बार वर्षो एक दिवसनीपेठे व्यतीत थयां. ॥ ५९ ॥ नहेरसरखी वेश्याए धीमे धीमे खेंची लीधेलुं तेनुं सघळुं धन कुंड-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ६० ॥ धने प्राग्वदनायाति । धनायंत्यथ कुट्टिनी । अनुशिष्य निजां चेटीं । प्रैषीद्धम्मिल्लधाम-
नि ॥ ६१ ॥ इषुवद्धर्मनिर्मुक्ता । स्वलक्षेच्छुः दृणाद्ययौ ॥ दूरे तद्धामनि घना— श्रयवीथीमतीत्य
सा ॥ ६२ ॥ क्वचित् खरैः खुरैः क्षुण्णं । प्रवरैर्विपनीमिव ॥ आवृतं वृत्तिवत्क्वापि । वेल्लद्वल्लीवितान-
कैः ॥ ६३ ॥ क्वचिन्मध्योद्गताश्वत्थ— मूलप्रभृष्टभित्तिकं ॥ क्वापि शुभ्रसुधास्थाने । लूतापुटकपूरितं
॥ ६४ ॥ वज्रदंतकुलैः क्लृप्त—सुरंगमिव सर्वतः ॥ लालाजालेन लूताभि—रिव प्रकृततानकं ॥

---

ना जवानीपेठे खूटी गयुं. ॥ ६० ॥ हवे पूर्वनीपेठे धन न आववाथी धनने इच्छती कुट्टणीए पो-
तानी दासीने शिखावीने धम्मिल्लने घेर मोकली. ॥ ६१ ॥ बाणनीपेठे न्यायथी ( धनुषथी ) र-
हित थयेली तथा पोतानाज लक्ष्यनी इच्छावाळी ( लाखोगमे धननी इच्छावाळी ) ते दासी घणा
घरोवाळी शेरी ( घणा आश्रयवाळी सुभटश्रेणि ) उल्लंगीने दूरसुधि धम्मिल्लने घेर गइ. ॥ ६२ ॥
त्यां कोइक जगोए मोटा खरोए पोतानी खरीओथी उकरडानीपेठे खोदेलुं, तथा क्यांक
वाडनीपेठे दोलायमान थती वेलडीओना समूहोथी वींटायेलुं. ॥ ६३ ॥ तथा क्यांक वच्चे उगेला
पीपळाना मूळीयांओथी पडी गयेली भींतवाळुं, तथा क्यांक सफेद चुनाने ठेकाणे करोळीयाओना

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ६५ ॥ विजनं वनवन्मौलि-प्ररूढतृणमद्रिवत् ॥ मूर्खोक्तिवदसंस्कारं । निःश्रीकं क्षीणदेहवत् ॥
॥ ६६ ॥ श्यामीभूतसुधालेपं । पतद्द्वारं श्लथार्गलं ॥ परितोऽवस्कराकीर्णं । तद्दासी प्रविवेश सा ॥
॥ ६७ ॥ पंचभिः कुलकं ॥ तत्राल्पाभरणां किंचि—ल्लूनपुष्पां लतामिव ॥ ईषद्म्लानतनुं रात्रि-शेषे शशिकलामिव ॥ ६८ ॥ एकांते स्वामिनो नाम । जपंतीं योगिनीमिव ॥ शार्दूलीमिव दुर्द-

---

पडोथी भरेलुं, ॥ ६४ ॥ तथा सर्व जगोए उंदरोना समूहोए जाणे सुरंगोवाळुं कर्युं होय नहि तेवुं, तथा करोळीआओए पोतानी लाळना जाळांथी जाणे ताणावाणावाळुं कर्युं होय नहि तेवुं, ॥ ६५ ॥ वननीपेठे उजड, पर्वतनीपेठे जेनापर घास उगी नीकळेलुं छे एवुं. तथा मूर्खना वचननीपेठे संस्कारविनानुं एटले खाडाखडबावाळुं. क्षीण थयेलां शरीरनीपेठे शोभाविनानुं ॥ ६६ ॥ काळो पडी गयेल छे चुनानो लेप जेमां एवुं, पडवानी अणीपर छे द्वार जेनुं एवुं, ढीली थइ गयेल छे अर्गला जेनी एवुं, चारे बाजु कचराथी भरेलुं. एवां ते धम्मिलना घरमां ते दासीए प्रवेश कर्यो. ॥ ६७ ॥ त्यां तेणीए थोडांक चुंटायेलां पुष्पोवाळी लतानीपेठे स्वल्प आभूषणोवाळी तथा प्रभातकाळनी संध्यासमये चंद्रनी कळानीपेठे जरा म्लान शरीरवाळी, ॥ ६८ ॥ तथा योगि-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

र्षां । सा ह्युलोके यशोमतीं ॥ ६९ ॥ युग्मं ॥ तां दशां सद्मनस्तस्या । अपि वीक्ष्य दरिद्रतां ॥ नि-
श्चिकाय तथाप्येषा । धृत्वा धार्ष्ट्यमवोचत ॥ ७० ॥ मां चंद्रवदने चंद्र–वदनेककलालयः ॥ तवो-
दंतं धनं चाप्तुं । प्राहिणोदिह धम्मिलः ॥ ७१ ॥ प्रेषिताप्यक्कया तत्र । सा धम्मिलमुदाहरत् ॥ ह्री
वेश्यानामलीकोक्तेः । कासिका दासिका अपि ॥ ७२ ॥ भर्तुर्नाम्ना श्रुतेनापि । चंचद्रोमांचकंचुका
अवदत्प्रमदोत्फुल्ल—नेत्रांभोजा यशोमती ॥ ७३ ॥ अहो महोत्सवः पुण्यै—रद्य जागरितं मम ॥

नीनीपेठे एकांते पोताना स्वामिनुं नाम जपनारी, अने सिंहणनीपेठे अत्यंत सावधपणे रहेली एवी यशोमतीने दीठी. ॥ ६९ ॥ घरनी तथा यशोमतीनी ते अवस्था जोइने तेणीए निश्चय कर्यो के अहिं तो हवे केवल कंगालपणुंज छे, तोपण धिठाइ धारण करीने कहुं के ॥ ७० ॥ हे चंद्रमुखि! चंद्रनीपेठे अनेक कलावाळा धम्मिले मने अहिं तारा समाचार तथा धन लेवामाटे मोकली छे. ॥ ७१ ॥ जो के तेणीने कुटणीये मोकली हती, तो पण तेणीए धम्मिलनुं नाम आप्युं! अरेरे! वेश्याओनी दासीओ पण जूठां वचनोना रोगवाळी होय छे. ॥७२॥ भर्तारनुं नाम सांभलवाथी पण जेणीना रोमांचो खडां थयेलां छे एवी तथा हर्षथी प्रफुल्लित नेत्रकमलवाळी

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यदाकर्ण्यत जीवंत्या । स्वामिनाम श्रवःसुधा ॥ १४ ॥ कचित्कुशलमत्रास्ति । प्रियः स प्रियदर्शने ॥ तन्नाममंत्रस्मरणा—न्ममाप्यकुशलं कुतः ॥ १५ ॥ धनमानययां चक्रे । यद्भर्ता भर्तृदारिके ॥ आज्ञा मंगल्यदूर्वेव । मूर्ध्नि सारोपिता मया ॥ १६ ॥ पुनः किं वच्मि निःपुण्या । यत्तादृक् श्वसुरो हितः ॥ सापि श्वश्रूर्ममाभाग्या—दध्यासातां परं भवं ॥ १७ ॥ गतः परिजनः सर्वः । क्षीणं च प्राक्तनं धनं ॥ मरुभूमाविव मयि । कुतस्तत्कमलोदयः ॥ १८ ॥ तुभ्यमद्यानवद्यांगि । यद्द्यामल्प-

---

यशोमती बोली के, ॥ १३ ॥ अहो! आजे तो मारे महोत्सव थयो छे, तथा आजे मारां पुण्यो जाग्यां छे, के जेथी आजे जीवतांथकां में कर्णने अमृतसरखुं स्वामीनुं नाम सांभळ्युं छे. ॥१४॥ वळी हे प्रियदर्शनवाळी! मारा ते स्वामिनाथ कुशल तो छे? वळी तेमना नामरूपी मंत्रना स्मरणथी मने पण अकुशल क्यांथीज होय? ॥ १५ ॥ वळी हे सपत्नि! मारा स्वामीए जे धन मंगाव्युं, ते तेमनी आज्ञा में मंगलिक दुर्वानीपेठे माथे चडावी छे. ॥ १६ ॥ वळी हुं पुण्यविनानी तने शुं कहुं? जे मारो हितेच्छु ससरो हतो ते, तथा ते मारी सासु. ते बन्ने मारां अभाग्यथी परलोक पाम्यां छे. ॥ १७ ॥ सघळो परिवार पण चाल्यो गयो, तेमज पूर्वनुं धन पण नष्ट थयुं,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मेव तत ॥ यज्जीवितेशसंदेशः । स्वर्णकोट्यापि दुर्लभः ॥ ७ए ॥ इमां जर्त्रा विना जार-करीं जू-
षां गृहाण तत् ॥ ममांगे शीलमेवैकं । जूषणं स्यादकृत्रिमं ॥ ०० ॥ इत्युक्त्वा निःस्वनं बाला ।
रुदती जूषणानि सा ॥ देहाद् डुमात्फलानीव । स्वहस्तेनोदतारयत् ॥ ०१ ॥ दासी जग्राह तच्छी-
ल-परिशीलनविस्मिता ॥ तानि हस्तेन न हृदा—ऽकाजीत्या न च तृष्णया ॥ ०२ ॥ तामनुज्ञाप्य-

अने मरुजूमीजेवी जे हुं तेनाविषे हवे लक्ष्मीनो (कमलोनो) उदय क्यांथी होय? ॥ ७० ॥
वळी हे अनवद्य शरीरवाळी! हुं तने जे कइं आपुं बुं ते स्वल्पज बे, केमके मारा प्राणनाथनो
संदेशो क्रोडो सोनामहोरोथी पण दुर्लज बे. ॥ ७ए ॥ माटे जर्तारविना फोकट जार करनारां
मारां आ आजूषणोने तुं ग्रहण कर? मारां शरीरपर फक्त एक शीलरूपी स्वाजाविक जूषणज बी-
क बे. ॥ ०० ॥ एम कहीने शब्दरहित रडती एवी ते यशोमतीए वृक्षपरथी जेम फळो तेम पो-
ताने हाथे शरीरपरथी ते आजूषणो उतार्यां. ॥ ०१ ॥ तेणीना आचरणथी विस्मय पामेली ते
दासीए हृदयथी नहि परंतु हाथथी, तेमज लोजथी नहि परंतु कुरुणीना डरथी ते आजूषणो
लीधां ॥ ०२ ॥ सर्व स्त्रीजातिनो यश करनारी एवी ते यशोमतीनी रजा लेइने ते दासीए घेर

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निःशेष—योषिज्जातियशस्करीं ॥ गृहागताग्रतोऽमुंचत् । कुट्टिन्या भूषणानि सा ॥ ८३ ॥ तदास्य-
कूपतः पीतै-र्यशोमत्याः कथामृतैः ॥ जरती विस्मिता मौलिं । धुनतीति व्यनावयत् ॥ ८४ ॥ या
प्रीणाति स्वभूषाभि—रीदृग्दशमपि प्रियं ॥ सर्वनारीशिरोरत्नं । सेयं जीयाद्यशोमती ॥ ८५ ॥ क-
ठिनः कश्मलो यस्याः । प्रेमहेम परीक्षितुं ॥ कषपट्टायते भर्त्ता । सेयं जीयाद्यशोमती ॥ ८६ ॥
मृन्मण्योः सरमासिंह्योः । कुवलीरंभयोरिव ॥ गुर्वी भिन्मम यस्याश्च । सेयं जीयाद्यशोमती ॥८७॥

---

आवीने ते आभूषणो कुटणीनीपासे मेल्यां. ॥ ८३ ॥ तेणीना मुखरूपी कुवामांथी पीधेलां यशो-
मतीनी कथारूपी अमृतवडे करीने विस्मय पामेली ते डोकरी कुटणी मस्तक धुणावतीथकी वि-
चारवा लागी के, ॥ ८४ ॥ जे आवी अवस्थावाला भर्तारने पण पोताना आभूषणोथी खुश करे
छे एवी तथा सर्व स्त्रीजनमां मुकुटसरखी ते आ यशोमती जयवंती वर्तो. ॥ ८५ ॥ जेणीना प्रेमरूपी
सुवर्णनी परीक्षा करवामाटे कठीन अने श्याम भर्ता कसोटीसरखो थयेलो छे ते आ यशोमती
जयवंती वर्तो. ॥ ८६ ॥ माटी अने मणि, कुतरी अने सिंहण, तथा कंथेर अने केळवच्चे जेटलो
तफावत छे तेटलो मारा अने यशोमतीना वच्चे तफावत छे, ते आ यशोमती जयवंती वर्तो. ॥८७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

शैत्यमग्नौ महो ध्वांते । शमोऽहौ वारि जंगले ॥ स्नेहो भस्मनि लालित्यं । पाषाणे कमलं स्थले ॥ ८८ ॥ यथा तथा यदाचार–चारिम्णा मम चेतसि ॥ दुर्घटापि दयोदीये । सेयं जीयाद्यशोमती ॥ ८९ ॥ युग्मं ॥ भृशोपभुज्यमाने‌भ्य—वित्तवा भोगवत्सटा ॥ सती निर्माल्यमेषा मे । भूषा न स्पृष्टुमर्हति ॥ ९० ॥ अथाष्टाढ्यसहस्रेण । स्वदीनारै समन्वितां ॥ भूषां प्रत्यर्पयामास । यशोमत्यै तयैव तां ॥ ९१ ॥ नाघ्राता कुट्टिनीव्याघ्या । दृग्गोचरगतापि यत् ॥ अतः सा तां प्रभाताढ्या

जेम अग्निमां शीतलता, अंधकारमां तेज, सर्पमां शांतपणुं, जंगलमां पाणी, राखमां चीकाश, पाषाणमां नरमाश तथा स्थलपर जेम कमल ॥ ८८ ॥ तेम जेणीना आचारनी मनोहरताथी मारा मनमां कदापि पण न आवे एवी दया उत्पन्न थइ छे, ते आ यशोमती जयवंती वर्तो. ॥ ८९ ॥ घणां वपरायेलां तथा शाहुकारना वैभवसरखां एवां सतीए निर्माल्य करेलां आ आभूषणने सर्पनी फणानीपेठे मारे स्पर्श करवो पण युक्त नथी. ॥ ९० ॥ पछी ते कुटणीए पोतानी एक हजार ने आठ सोनामहोरोसहित ते आभूषणो ते दासी मारफतेज यशोमतीने पाछां मोकलावी आप्यां. ॥९१॥ नजरे पडेलां एवां पण आ आभूषण ते कुटणीरूपी वाघणे सुंघ्यां पण नही, माटे तेने प्र-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

—मिव जग्राह गौरवात ॥ ७२ ॥ अथानागमनं भर्तु—र्निश्चित्याऽरोदि बालया ॥ हा त्वयीश तट-
स्थेऽपि । जाता प्रोषितपत्न्यहं ॥ ७३ ॥ सोढः श्वशुरयोर्मृत्युः । सोढः संपत्क्षयो मया ॥ हा सोढ-
व्यः कथं नाथ । यौवने विरहस्तव ॥ ७४ ॥ नलिनीव विना नीरं । निराधारा पतिं विना ॥ ए-
काकिनी कियत्काल—मबला किल नंदति ॥ ७५ ॥ दक्ष दक्षिणहस्तं मे । दत्वा स्वजनसाक्षिकं
॥ विपर्यस्तोऽसि यद्बाल—मालप्य पुरुषः प्रभुः ॥ ७६ ॥ अहं तत्राप्युपेत्य त्वा—मनुनीयानये ननु

भाववाळां मानीने तेणीए गौरवपूर्वक पाछां ग्रहण कर्या.॥ ७२ ॥ हवे मारो स्वामी आवशे नहि
एम निश्चय करीने ते बिचारी यशोमती विलाप करवा लागी के, हे स्वामी आप अहींज बेठां छ-
तां पण हुं भर्तारविनानी स्त्रीसरखी थइ छुं ॥ ७३ ॥ में सासुससरानुं मरण सहन कर्युं, धननो वि-
नाश सहन कर्यो परंतु हे स्वामी! आ यौवनवयमां आपनो विरह मारे शीरीते सहन करवो? ॥
॥ ७४ ॥ जल विना कमलनीनीपेठे पतिविना नीराधार थयेली एकली अबला केटलो काल नभी
शके? ॥ ७५ ॥ हे चतुरस्वामी! स्वजनोनी समक्ष मने पोतानो जमणो हाथ आपीने हवे
आप फरी बेठेला छो! अथवा आपने हुं शुं ठपको देउं? पुरुष मालीक छे. ॥ ७६ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ न चेद्विघ्नं विधत्तेसौ । पापा कुलवधूस्थितिः ॥ ८७ ॥ नित्यं वससि मच्चित्ते । मम वेत्सि न वेदनां ॥ ममाभाग्यैर्गतं यत्ते । ज्ञानं तन्नाथ मृष्यतां ॥ ८८ ॥ यशोमती विलप्येति—विक्रीयावासमाशु तं ॥ त्यक्तसंसारसौख्याशा । पितुरावासमासदत् ॥ ८९ ॥ अथ बुध्ध्वाऽधनं श्रेष्ठी-नंदनं स्वसुतां जगौ ॥ शंभली लोभलीनांतः- करणा करुणोझ्झिता ॥ ९०० ॥ पुत्रि कृत्रिमारागेण । व्यापाराः पणयोषितां ॥ तत्त्वं किं तात्त्विकं प्रेम । धत्से तुभ्येऽत्र धम्मिल्ले ॥ १ ॥ कलाकुलीनतारूप—

वळी आ कुलवधूनी पापी मर्यादा जो मने वच्चे विघ्नकारी न होत तो हुं ते वेश्याने घेर आवीने पण आपने समजावीने पाछा लावत. ॥ ८७ ॥ आप हमेशां मारा चित्तमां वसो छो, परंतु मारी वेदनाने जाणता नथी, केमके मारां अभाग्योथी आपनुं ते ज्ञान पण नाश पामेलुं लागे छे, माटे हे स्वामी हवे आप कइंक विचार करो? ॥८८॥ एवी रीते ते यशोमती विलाप करीने तथा जलदी ते घर वेचीने अने संसारसुखनी आशा छोडीने पोताना पिताने घेर आवी रही. ॥८९॥ हवे शेठना पुत्र धम्मिल्लने निर्धन थयेलो जाणीने लोभी मनवाळी तथा निर्दय कुट्टणीए पोतानी पुत्री वसंततिलकाने कह्युं के, ॥ ९०० ॥ हे पुत्रि! आपणो वेश्याओनो व्यापार तो कृत्रिम

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

सौभाग्यप्रमुखाः गुणाः ॥ धनहीना न शोभंते । विसर्पिर्भोजनं यथा ॥ २ ॥ तदाकिंचित्करं मुंच । निर्धनत्वेन धम्मिलं ॥ महाकविवदर्थैक-रसिका हि पणस्त्रियः ॥ ३ ॥ तदश्रुतिचरं श्रुत्वा । वचनं मातुरातुरा ॥ वंसततिलकावादी-दविलंब्य वचस्ततः ॥ ४ ॥ आसन्ने मरणे मात-वैकल्यं किं तवागतं ॥ देवीनामपि दुःप्रापं । यत्त्याजयसि माममुं ॥ ५ ॥ अयं रूपेण कंदर्पो । विवेकेन बृहस्प-

---

रागवाळो होय छे, तो पछी आ तुछ धम्मिलप्रते तुं सत्य प्रेम शामाटे धारण करे छे? ॥ १ ॥ जेम घृतविनानुं भोजन तेम कला, कुलीनपणुं, रूप तथा सौभाग्यआदिक गुणो धनविना शोभता नथी. ॥ २ ॥ माटे हवे निर्धनपणाथी निरुपयोगी एवा आ धम्मिलने तुं छोडी दे, केमके वेश्याओ तो महाकविनीपेठे फक्त एक ( अर्थनाज ) धननाज रसवाळी होय छे. ॥ ३ ॥ एवी रीते मातानुं नहि सांभळवालायक वचन सांभळीने खेद पामेली वसंततिलका तुरत बोली के, ॥ ॥ ४ ॥ हे माता तारुं मरण नजीक होवाथी शुं तारी बुद्धि फरी गइ छे? के जेथी देवीओने पण दुर्लभ एवा आ धम्मिलने तजवानुं तुं मने कहे छे! ॥ ५ ॥ आ धम्मिल रूपें कामदेवसरखो छे, विवेकमां बृहस्पतिसमान छे, गंभीरतामां समुद्रतुल्य छे, तथा उदारतामां वरसादसमान छे. ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

तिः ॥ गांभीर्येण पयोराशि–रौदार्येण घनाघनः ॥ ६ ॥ कलाभिः कौमुदीकांतो । धीरिम्णामरभू-
धरः ॥ प्राप्तः प्राक्सुकृतैर्नैव । विनागस्त्यागमर्हति ॥ ७ ॥ युग्मं ॥ गुणिन्येवानुरज्यंति । गुणज्ञा
न धनाश्रये ॥ श्रीवृक्षमलयस्त्यक्त्वा । यांति जातिं कृशामपि ॥ ८ ॥ पश्याऽविभवमप्याशु । गुणा-
ढ्यं रत्नकंबलं ॥ संगृह्णंते महीपाला । मातर्जातस्पृहा न किं ॥ ९ ॥ अदत्त यदसौ वित्तं । किं
सिंधूर्मिसधर्मणा ॥ शांता न तेन ते तृष्णा । वाडवाग्निशिखासखी ॥ १० ॥ यदीयतोऽपि द्रव्यस्य

---

॥ ६ ॥ कलाउमां ते चंद्रसरखो छे तथा धैर्यमां मेरुसरखो छे, वळी ते पूर्वना पुण्योथीज आप-
णने प्राप्त थयो छे, माटे अपराधविना तेनो त्याग करवो युक्त नथी. ॥ ७ ॥ गुणज्ञ माणसो गु-
णिमांज रंजित थाय छे, परंतु धनवानमां थता नथी. केमके भमराउ चंदनने छोडीने दुर्बळ ए-
वां पण जाइना वृक्षप्रते जाय छे. ॥ ८ ॥ वळी हे माता तुं जो के अविभव एटले शोभाविनानो
( घेटांना उनथी बनेलो ) एवा पण गुणोवाळा ( तंतुउवाळा ) रत्नकंबलने इच्छापूर्वक शुं राजा-
उ तुरत ग्रहण करता नथी? ॥ ९ ॥ वळी तेणे जे धन आप्युं छे, ते समुद्रना मोजांसरखा धन-
थी पण शुं तारी वडवानलनी ज्वालासरखी तृष्णा नाश पामी नहि? ॥ १० ॥ वळी हे माता!

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

। दाता मातर्मयोज्झ्यते ॥ स्वं न श्वानं तदा मन्ये । मनाग्दातुः सदानुगं ॥ ११ ॥ इति तद्वच नाधार—धारधोरीकृतोऽमुचत ॥ वचःस्फुलिंगकानेव—मक्का कोपवृषाकपिः ॥ १२ ॥ अभूदभूतपूर्वस्ते । पुत्रि कोऽयं कदाग्रहः ॥ विचारश्चारुबुद्धीनां । न युक्तो गुरुशासने ॥ १३ ॥ याः स्वलक्ष्यममुंचंत्यः । कुर्वंति जनरंजनं ॥ योगिनीनामिवैतासां । वेश्यानां प्रेम दूषणं ॥ १४ ॥ ह्रीरर्थिनि दया व्याधे । कितवे सत्यसारता ॥ वानरे स्थेम वेश्यायां । प्रेमावश्यं विडंबना ॥ १५ ॥ विधाय तदमु

---

आटला बधा धनना दातारने पण जो हुं तजी देउं तो हुं थोडुं देनारनी पाछळ पण हमेशां जनारा एवा श्वानसरखा पण मारा आत्माने हुं मानी शकुं नहि. ॥ ११ ॥ एवी रीतनां तेणीनां वचनोनो तिरस्कार करनारां वचनरूपी तणखाउने क्रोधरूपी अग्निवाळी कुट्टणी ओकवा लागी. ॥ ॥ १२ ॥ हे पुत्रि! अगाउ कोइ पण समये नहि थयेलो एवो आ तने आजे शुं कदाग्रह थयो छे? बुद्धिवानोए वडीलना हुकममाटे विचार करवो लायक नथी. ॥ १३ ॥ जेउ पोताना लक्ष्यने छोड्याविना लोकोने खुशी करे छे, एवी योगिनीसरखी वेश्याउमाटे प्रेम ए एक दूषण छे. ॥१४॥ याचकने लज्जा, पाराधिने दया, ठगाराने सत्य, वानरने स्थिरपणुं, अने वेश्यानो प्रेम ए सघळुं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कंचि-दाढ्यं मुंच परं नरं ॥ व्रातीनता हि वेश्यानां । समायः शमिनामिव ॥ १६ ॥ एवमग्न्यस्त्र-
वन्मत्वा । मातुः संतापकं वचः ॥ वारस्त्री वारुणास्त्राभं । संदधे सुंदरं वचः ॥ १७ ॥ यथा विचारः
प्राज्ञानां । न युक्तो गुरुशासने ॥ किं प्रपन्नपरित्याग—स्तथा संगतिमंगति ॥ १८ ॥ पूर्वं न क्रि-
यते स्नेहः । क्रियते वा कथंचिद्यदि ॥ श्रेयांस्तदयमूर्णायौ । लाक्षाराग इव ध्रुवः ॥ १९ ॥ इत्यद्भि-

---

विडंबनारूप एटले न घटी शके तेवुं छे. ॥ १५ ॥ माटे हवे कोइ बीजा धनवान पुरुषने पोतानो स्वामी करीने आने तजीदे? केमके मुनिओनीपेठे वेश्याओनुं पण समायरूप एटले धनना सारा लाभरूप ( सामायिकरूप ) व्रत छे. ॥ १६ ॥ एवी रीतनां पोतानी माताना अग्निशस्त्रनीपेठे संतापकारक वचन सांभळीने वसंततिलका वारुणास्त्रसरखुं सुंदर वचन बोली के, ॥ १७ ॥ जेम बुद्धिवानोए वडीलना हुकममाटे विचार करवो योग्य नथी, तेम स्वीकारेलानो त्याग करवो ते वात पण शुं घटी शके छे? ॥ १८ ॥ प्रथम तो स्नेहज करवो नहि, अने कदाचित् करीए तो ते ऊनना कापडमां जेम मजीठनो रंग तेम ते निश्चल करवो तेज कल्याणकारी छे. ॥ १९ ॥ आटला दिवसोमां जे में आ स्थिर सिद्धो अने ऊंचो प्रेमरूपी महेल चण्यो छे, तेने हुं मारे हा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वासरैः प्रेम–प्रासादो योऽत्र निर्ममे ॥ स्थिरः समः समुत्तुंग—स्तं स्वयं पातये कथं ॥ २० ॥ नान्यत्र रमते चेतो । निध्यातैतद्गुणं मम ॥ विश्राम्यति करीरे किं । रसालरसिकः पिकः ॥ २१ ॥ मातर्मातः परं वोचः । शोचनीयमिदं वचः ॥ चेत्त्वं चारित्रवामासि । तर्हि पंथा ममापि सः ॥२२॥ ब्रुवानेवं गतः काल–स्तयोर्विवदमानयोः ॥ उपर्यधो वा नैकस्या । अपि पक्षोऽजनत्पुनः ॥ २३ ॥

अन्यदा कुंदसंकाश–रदा सा शरदागमे ॥ बुभुक्षुरीक्षुखंडानि । ययाचे मातरं मुदा ॥ २४ ॥

---

थे केम पाडुं? ॥ २० ॥ आ धम्मिल्लना गुणोनाज ध्यानवाळुं मारुं चित्त अन्यविषे खुश थाय तेम नथी, आंबानी रसीक कोयल शुं कंथेरपर विश्राम करशे? ॥ २१ ॥ माटे हे माता! हवेथी तुं आवुं शोचनीय वचन बोलती नहि, अने जो तुं तेने कहाम्ती मेलीश तो मारो पण तेज मार्ग तारे जाणवो? ॥ २२ ॥ एवी रीते विवाद करतांथकां तेउ बन्नेनो घणो काळ गयो, परंतु बन्नेमांथी एकनो पण पक्ष उपर नीचे थयो नहि. ॥ २३ ॥

पछी एक वखते शरदऋतुसमये मोगरनी कळीसरखा दांतवाळी ते वसंततिलकाए सेलडी खावानी इच्छाथी पोतानी मापासे हर्षथी तेना टुकडा माग्या. ॥ २४ ॥ त्यारे तेणीए यंत्रमां पी-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तया समर्पि तैर्यंत्र-पीडितपांडुपुंड्रकैः ॥ किं ॥ कूर्चकैः करोम्येभि-रिति सा प्रत्यवोचत ॥२५॥ सा-
थ लब्धावकाशाऽवक् । कोपकंप्रौष्टपल्लवा ॥ निःसारवस्त्वादरिणी । प्रियप्राप्तौ विषीद मा ॥ २६ ॥
निःसारो यदि भर्त्तायं । जातस्ते प्रीतिकारणं ॥ तद्वस्त्रखाद्यभूषाद्यं । देयं निःसारमेव ते ॥ २७ ॥
सा विज्ञाततदाकूता । वाचमूचे किमंब ते ॥ गतं दृग्धाम यन्नैषां । गुणं संतमपीक्षसे ।२८॥ अ-
ग्निदग्धैरपि क्षारो । योऽमीभिः किल जायते ॥ वासोमलीमसं शोध्धु-मलं कस्तं विना परः ॥२९॥

---

लेली श्वेत शेरडी आपी, त्यारे वसंततिलका बोली के आ कुचाउने हुं शुं करुं? ॥ २५ ॥ त्यारे क्रोधथी कंपता ओष्टपल्लववाळी ते कुटणीए पोताने अवसर मलवाथी कह्युं के हे निःसार वस्तुना आदरवाळी पुत्रि! तने आ मनगमतुंज मळ्युं छे, माटे खेद न कर? ॥ २६ ॥ आ साररहित भर्तार ज्यारे तने प्रीतिना कारणरूप थयो छे, त्यारे वस्त्र, भोजन तथा आभूषणआदिक पण तने साररहितज देवुं जोइये. ॥ २७ ॥ त्यारे तेणीनो अभिप्राय जाणीने वसंततिलका बोली के हे माता! शुं तारुं आंखोनुं तेज नष्ट थयुं छे? के जेथी आना छता गुणने पण तुं जोती नथी. ॥ ॥ २८ ॥ आ कुचाउने अग्निमां बाळवाथी तेनो जे खार थाय छे, तेनाविना कपडांनो मेल को-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हेमंते हेमगौरांगी । सा कदाचिदयाचत ॥ तिलानकां मुदे हि स्या—द्गुरुदत्ता सुखादिका ॥३०॥
खलं समर्प्य सा दत्त—पृष्ठा पृष्ठा तया रयात् ॥ उत्तूंखला खलापीमं । स्वं चक्रे प्राग्वदुक्तिभिः ॥
॥ ३१ ॥ सा प्रत्यूचे न किं वेत्सि । लगते यद्यमुं खलं ॥ सैरिभी तत्पयोदाना—दंब कादंबिनी-
यते ॥ ३२ ॥ यावकं याचितान्येद्यु—स्तया क्रमनखश्रिये ॥ जरत्यदत्त पद्ममाणि । निश्चयोतितर-
सानि सा ॥ ३३ ॥ पृष्ठा प्राग्वत् प्रजल्पंती । तयाकाऽवादि निष्ठुरं ॥ मातर्मूढासि यद्दोषा—नेषु

---

ण कहाडी शके तेम छे ? ॥ २९ ॥ हेमसरखां गौर शरीरवाळी ते वसंततिलकाए हेमंतऋतुमां ए-
क दिवस पोतानी मातापासे तल माग्या, केमके वडीले आपेली सुखडी हर्षकारक थाय छे. ॥
॥ ३० ॥ त्यारे ते पण तेणीने खोळ आपीने जेवी पाछी वळी, त्यारे तेणीए पुछवाथी ते उच्छूं-
खल कुट्टिनी पूर्वनीपेठे वचनोथी पोताना आत्माने खळसमान करवा लागी. ॥ ३१ ॥ त्यारे व-
संततिलका बोली के, हे माता ! तुं जाणती नथी के जो आ खोळ गायने आपवामां आवे तो
ते दूध देवामां मेघमाळासरखी नीपजे. ॥ ३२ ॥ वळी एक दिवसे तेणीए पगना नखो रंगवामाटे
मजीठ मागी, त्यारे ते डोकरीए तेणीने नीचोवेल रसवाळां तेनां फोतरां आप्यां. ॥ ३३ ॥ पूछ-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

केवलमीक्षसे ॥ ३४ ॥ दीपः क्रियेत यद्येत—द्वर्त्या नक्तैरिकोपमं ॥ कंचित्प्रपंचयत्येवा—लोकमो कःप्रकाशकं ॥ ३५ ॥ अक्का दध्यौ ध्रुवमियं । धूर्त्तेनानेन वंचिता ॥ नो चेन्निर्धनमप्येतं । हा कथं धनदीयति ॥३६॥ गंधशैल इव स्थूलो । मुधा रुध्ध्वा गृहं स्थितः ॥ यया कयाचिद् बुध्ध्येव। निर्वास्योऽबलया मया ॥ ३७ ॥ ततो द्रोहविनिद्रोद्रा–चांतचित्ता सदैव सा ॥ उत्सवव्यजना पान–गोष्ठीमारजतान्यदा ॥ ३८ ॥ वसंततिलका चान्यो—ऽपि च पण्यांगनाजनः ॥ दुरुपायविदाऽपायि ।

वाथी पूर्वनीपेठे कहेनारी ते कुटणीने वसंततिलकाए निर्भ्रंछनापूर्वक कह्युं के, हे माता! तुं केवळ मूर्ख छे, के आ फोतरांमां तुं केवळ दोषोज जोया करे छे. ॥ ३४ ॥ जो आ फोतरांजनी वाटथी दीपक करवामां आवे तो घरमां तेज करनारो लाल रंगनो प्रकाश थाय. ॥ ३५ ॥ त्यारे ते कुटणीए विचार्युं के खरेखर ते धूर्ते आने ठगेली छे, जो एम न होय तो आ निर्धन धम्मिलने पण ते कुबेरसमान केम जाणे? ॥ ३६ ॥ मोटा खडकनीपेठे आ फोकट घर रोकीने बेठो छे, माटे हवे कइंक बुद्धि चलावीने मारे आने कहाडी मेलवो जोइये. ॥ ३७ ॥ पछी हमेशां द्रोहयुक्त खुल्लाविचारवाळा मनवाळी ते कुटणीए एक दिवस उत्सवना मिषथी मद्यपाननी गोष्ठी

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तया निःप्रसरं सुरां ॥ ३९ ॥ उच्चावचगिरस्ताम्र—कपोला घूर्णितेक्षणाः ॥ प्रमदा मदयामासु—
र्न कं पीतमदास्तदा ॥ ४० ॥ अथायःशूलिकी स्वांते । वचसामृतसारणी॥ शंभली दंभलीनात्मा—
ऽन्वशिषद्धम्मिलं रहः ॥ ४१ ॥ वत्स नाद्रियसे मद्यं । वेश्यौकसि वसन्नपि ॥ केयं ते वैदुषी वस्तु
—ऽन्यपदोषेऽपि रोषिणः ॥ ४२ ॥ यदागतं वार्धिविलोडनेन । यदादृतं यादवनायकेन ॥ यदुन्नु-

---

नो प्रारंभ कर्यो. ॥ ३८ ॥ ते समये दुष्ट उपायने जाणनारी ते कुटणीए वसंततिलकाने तथा बी-
जी वेश्याओने पण खूब मद्यपान कराव्युं. ॥ ३९ ॥ ते वखते मद्यपान करनारी ते स्त्रीओ गली-
च वचनो बोलतीथकी लाल गंडस्थलोवाळी तथा घेरायेली आंखोवाळी थइ थकी कोने मदोन्म-
त्त करवा न लागी? ॥ ४० ॥ मनमां लोखंडनी शूलीसरखी, तथा वचनमां अमृतनी नहेरसरखी
ते दांभिक कुटणी गुप्त रीते धम्मिलने कहेवा लागी के, ॥ ४१ ॥ हे वत्स! तुं वेश्याने घेर रह्या
छतां जे मदिरा पीतो नथी, तो आ निर्दोष वस्तुमां पण रोष करनारो एवो जे तुं, तेनी आ च-
तुराइ ते केवा प्रकारनी? ॥ ४२ ॥ जे आ मद्य समुद्र वलोववाथी मळ्युं छे, तथा जेनो यादवो-
ना स्वामी श्रीकृष्णे पण आदर कर्यो छे, वळी जे बळ तथा शरीरनी कांति वधारनारुं छे, ते मद्य-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मदेहद्युतिवर्द्धनं च । तन्मद्यमुद्यच्छति को निषेद्धुं ॥ ४३ ॥ हृदो मृषा शल्यमपैति येन । येन स्वदेहेऽपि ममत्वभंगः ॥ आढ्ये दरिद्रेऽपि यतः समाधि—र्बुधा मुधा मद्यमिदं त्यजंति ॥ ४४ ॥ धर्षंत्येके हसंत्येके । जल्पंत्यन्ये यथा तथा ॥ तथापि हृढयोगीव । न क्षीवः क्वापि कुप्यति ॥४५॥ मधुपा यत्र खेलंति । मधु यत्रोपजायते ॥ तत्रांबुजे वसंती श्री—रपि विद्वेष्टि नो मधु ॥ ४६ ॥ दशधाकल्पवृक्षाणां । प्रथमे मद्यदायिनः ॥ चतुर्दशसु रत्नेषु । मद्यमंतरधीयते ॥ ४७ ॥ द्विषः सुखं

---

नो निषेध करवाने कोण उद्यमवंत थाय? ॥ ४३ ॥ वली जे मद्यथी हृदयनुं खोटुं शल्य निकली जाय छे, तथा जेथी पोताना शरीरनी पण ममता रहेती नथी, वली जेथी तवंगर तथा गरीब बन्नेने समाधि थाय छे, माटे आवा गुणवाला मद्यने तो पंडितो फोकट तजे छे. ॥ ४४ ॥ वली ते मद्यपान करनार मनुष्यने कोइ निंदे छे, कोइ हसे छे तथा कोइ जेम तेम बोले छे, तो पण ते महोटा योगीनीपेठे कोइपर पण गुस्से थतो नथी. ॥ ४५ ॥ ज्यां भमराओ क्रीडा करे छे, तथा जेमां मद्य उत्पन्न थाय छे, ते कमलमां रहेती लक्ष्मी पण मद्यने धिक्कारती नथी. ॥ ॥ ४६ ॥ दश प्रकारना कल्पवृक्षोमां पण पहेलां मद्य देनारां कल्पवृक्षो छे, तेम चौद रत्नोमां प-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कृषंतीन्न । मद्योपचितशक्तयः ॥ आपणाः कल्पपालाना—मत एवोन्नितध्वजाः ॥ ४८ ॥ तदाशु पिब मैरेयं । केयं वह्नी विमर्शना ॥ निजस्थानोचितं चेष्ट—मानो न खलु निंद्यते ॥ ४९ ॥ इ-त्युक्तः स तया भ्रष्ट—कुलाचारः सुरां पपौ ॥ यत्रैकं व्यसनं तत्र । संयुज्यंते पराण्यपि ॥ ५० ॥ लुठन्निद्रालुवत्पृथ्व्यां । शिथिलांगो मुमुर्षुवत् ॥ परासुरिव निश्चेष्टः । स मद्येन क्रमात्कृतः ॥ ५१ ॥ स्त्रीराज्यमिव कुर्वाणे । गणिक्ये जरतीगिरा ॥ पारे पुरं प्रदोषेऽसौ । दासीभिः परितत्यजे ॥५२॥

ण मद्य गणाय छे. ॥ ४७ ॥ मद्यपानथी बळवंत थयेला हाथीओ शत्रुओने सुखे मारी शके छे, त-था तेथीज किलालोनी दुकानोपर धजाओ फरके छे. ॥ ४८ ॥ माटे तुं जलदी मद्यपान कर? शामाटे घणो विचार करवो पडे छे? पोताना स्थानने उचित आचरण करनारो कइं निंदातो नथी. ॥ ४९ ॥ एवी रीते तेणीना कहेवाथी धम्मिले पण कुलाचारथी भ्रष्ट थइने मद्यपान कर्युं, केमके ज्यां एक व्यसन होय छे त्यां बीजां व्यसनो पण जोडाय छे. ॥ ५० ॥ पछी मद्यपानथी ते अनुक्रमे निद्रालुनीपेठे जमीनपर लोटवा लाग्यो, मरनारनीपेठे शिथिल अंगवाळो थयो, तथा मरेलानीपेठे चेष्टारहित थयो. ॥ ५१ ॥ स्त्रीराज्यनीपेठे गणिकाओनो समूह आचरते छते ते डो-

नूपीठे लुठतस्तस्य । सकलामपि शर्वरीं ॥ अनूत्प्रनूतभूबाय—मसहिष्णुर्दिनोदयः ॥ ५३ ॥ तदा-
र्हतेषु चैत्यैषु । मांगल्यः कंबुरध्वनत् ॥ निशि प्रसुप्तं श्रीधर्म—नूपमुद्बोधयन्निव ॥ ५४ ॥ अनुयां-
ती विधुं कांतं । रात्रिस्तारकनूषणा ॥ न नास्करकरस्पर्श—मपि सेहे पतिव्रता ॥ ५५ ॥ स्तोक-
कालं ममानावे । तमसा जग्रसे जगत् ॥ इति रोषादिवारक्त—मूर्त्तिर्मार्त्तंड उद्ययौ ॥ ५६ ॥ अ-
थ जागरितः पूष्णा । स्वकरैः कृपयेव सः ॥ स्वं नूरिनूरजोलिप्तं । निरीक्ष्येति व्यनावयत् ॥ ५७ ॥

---

करीना वचनथी दासीजए ते धम्मिलने संध्यासमये नगरनी बहार फेंकी दीधो. ॥ ५२ ॥ त्यां आ-
खी रात पृथ्वीपर लोटतां थकां पृथ्वीपरनां घणा ठायाने नहि सहन करनारो दिवसनो उदय थ-
यो. ॥ ५३ ॥ ते समये जिनमंदिरोमां रात्रिए सुतेला धर्मरूपी राजाने जाणे जगाम्तो होय न-
हि तेम मंगलिक शंखनाद थवा लाग्यो. ॥ ५४ ॥ वळी ते वखते तारारूपी आनूषणोवाळी रात्रि-
रूपी पतिव्रता स्त्री पोताना स्वामी चंद्रनी पाछळ जतीथकी सूर्यना करस्पर्शने पण न सहन कर-
वा लागी. ॥ ५५ ॥ मारी थोडा समयनी गेरहाजरीमां अंधकार आखा जगतने गळी गयो, एम
विचारी जाणे क्रोधथी होय नहि तेम लाल मूर्तिवाळो सूर्य उदय पाम्यो. ॥ ५६ ॥ हवे सूर्ये

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

क तत्सौधं क तत्तल्पं । क सा कांता मनोरमा ॥ ममादृश्यमभूद्दिव्य—मायामयमिवाखिलं ॥५८॥
किमन्यजन्म किं स्वप्न—मुत मायाथवा भ्रमः ॥ यत्तादृशं सुखं भुक्त्वा । लुठन्नस्मि महीतले ॥५९॥
न मया कोपितः कोऽपि । नयेद्यो मामिमां दशां ॥ नूनं निर्धनतादोषा—ज्जारत्या त्याजितस्तया ॥
॥ ६० ॥ ददे यस्यै पराभूतिः । पराभूतिस्ततो मया ॥ लेभे तदस्याः को दोषो । नाशो दत्तस्य

---

जाणे दयाथीज पोताना किरणोथी जगाडेलो ते धम्मिल पोताने जमीनपरनी घणी धूळथी खरडायेलो जोइने विचारवा लाग्यो के, ॥ ५७ ॥ अरे! ते महेल, ते शय्या तथा ते मनोहर स्त्री विगेरे क्यां गयुं! आ सघळुं मने दिव्य मायानीपेठे अदृश्य थइ गयुं छे! ॥ ५८ ॥ शुं मारो पुनर्जन्म थयो छे? अथवा शुं आ स्वप्न छे? अथवा माया के भ्रम छे? के जे हुं तेवुं सुख भोगवीने पृथ्वीपर लोटतो पड्यो छुं! ॥ ५९ ॥ में कोइने गुस्से कर्यो नथी के जे मने आ दशाए पहोंचाडे, खरेखर निर्धनपणाना दोषथी मने ते डोकरीए फेंकावी दीधो छे. ॥ ६० ॥ जेणीने में परा भूति एटले घणुं धन आप्युं छे, तेणीना तरफथी मने पराभूति एटले आ पराभव मळ्यो छे, तेमां तेणीनो शुं दोष छे, केमके दाननो नाश नथी, अर्थात् जेवुं देवुं तेवुं लेवुं छे. ॥ ६१ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नास्ति यत् ॥ ६१ ॥ परस्परं विरोधिन्यो । यासां चित्तवचःक्रियाः ॥ तासु लोभाभिभूतासु । विश्रं-
भः शंभलीषु कः ॥ ६२ ॥ एता लूता इवावेष्ट्य । कृत्रिमप्रेमतंतुभिः ॥ मक्षिकामिव मुंचंति । निः-
सारीकृत्य पूरुषं ॥ ६३ ॥ विभूयोगे मिंतिकावद्या । अरक्ता अपि रागदाः ॥ सिचामिव गुणाढ्यानां
। सतां ताभिर्न रंजनं ॥ ६४ ॥ चेत्कोऽपि वसुधाराभिः । पर्जन्य इव वर्षति ॥ एताः स्थूलस्थली-
प्राया । न तृप्यंति ततोऽप्यहो ॥ ६५ ॥ उत्पन्नः पौरधौरेय-श्रेष्टिनो निर्मले कुले ॥ अत्राप्नोमि ह-

---

जेउनां मन वचन अने क्रिया परस्पर विरोधवाळां छे, एवी ते लोभांध वेश्याउमां विश्वास शुं
कामनो छे? ॥ ६२ ॥ आ वेश्याउ करोळीयानीपेठे पुरुषने कपटप्रेमरूपी तंतुउथी वींटीने माखी-
नीपेठे साररहित करीने तजी दे छे. ॥ ६३ ॥ वळी ते वेश्या पोते अरक्त छतां व्यभिचारीउने
राग आपनारी छे, परंतु तंतुउवाळां कपमांनीपेठे गुणवानोने तेउसाथे राग थतो नथी. ॥ ६४ ॥
कदाच कोइ वरसादनीपेठे वसुधाराथी ( धनथी ) वर्षे तोपण मोटी पछरवाळी भूमिनीपेठे ते वे-
श्याउनी तृष्णा मटती नथी. ॥ ६५ ॥ अरे! नगरना लोकोमां मुकुटसमान एवा शेठना निर्मल
कुलमां उत्पन्न थयेलो आ हुं आवी रीते वेश्याथी विडंबना पामुं छुं! ॥ ६६ ॥ बाल्यपणामां पां-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

हा सोऽहं । बाह्यस्त्रीभ्यो विडंबनाः ॥ ६६ ॥ बाल्येऽपि पंचधात्रीणा-मंकस्थो यो व्यवर्द्धिषि॥ मही-
पीठे लुठन्नस्मि । स एवाद्यमनाथवत् ॥ ६७ ॥ जैनश्रुतामृतास्वाद-मनुभूयापि पापिनि ॥ किं सुरा-
पानव्यसने । रसने गलितासि न ॥ ६८ ॥ अस्तं प्रयाति सूरोऽपि । वारुणीसंगतो ध्रुवं ॥ यदहं
वारुणीयोगे । जीवन्नस्मि तदद्भुतं ॥ ६९ ॥ जाता ये योषितामिष्टा—स्ते भ्रष्टा एव धर्मतः ॥ वि-
षवल्लीवनं लीनाः । क्वचिज्जीवंति ते नराः ॥ ७० ॥ वरं वज्रनिपातेन । शतधा चूर्णितं शिरः ॥

---

च धात्रीओना खोळामां रहीने जे आ हुं वृद्धि पाम्यो छुं, तेज हुं आजे एक कंगालनीपेठे पृथ्वी-
पर लोट्या करुं छुं! ॥ ६७ ॥ वळी हे पापणी जिह्वा! जैन शास्त्ररूपी अमृतनो स्वाद अनुभव्या
छतां पण मद्यपान करती वेळाए तुं गळी केम न गइ? ॥ ६८ ॥ मद्यना ( पश्चिम दिशाना )
संगथी शूरो मनुष्य ( सूर्य ) पण खरेखर नाश ( अस्त ) पामे छे, परंतु हुं जे मदिराना संगथी
पण हजु जीवतो रह्यो छुं ते आश्चर्य छे! ॥ ६९ ॥ जे पुरुषो स्त्रीओने इष्ट थया छे तेओ धर्मथी
भ्रष्टज थया छे, केमके विषवल्लीना वनमां गयेला कोइकज पुरुषो जीवता रही शके छे. ॥ ७० ॥
वज्र पडवाथी चूरेचूरा थयेलुं मस्तक सारुं छे, परंतु पापी स्त्रीना वचनना विश्वासथी हणायेलुं म-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न तु निर्धर्मनारीवा-ग्विश्वासोपहतं मनः ॥ ७१ ॥ धन्यास्ते मुनयो धीराः। शीलसन्नाहशालिनः॥ योषावाग्विशिखा येषां। हृदयं व्यथयंति न ॥ ७२ ॥ कुट्टिनीयं गुरुप्राया । यस्याः शिक्षामिमां स्मरन् ॥ न पुनर्निपतिष्यामि । वाक्पाशे पण्ययोषितां ॥ ७३ ॥

अथ गत्वा गृहं कुर्वे । चिंतां प्रणयिनामिति ॥ ध्यायन् पुरे प्रविश्यासौ । स्वसौधद्वारमासदत् ॥ ७४ ॥ किं स्तः सुरेंद्रदत्तश्च । सुभद्रा च शुभास्पदे ॥ तेनेत्युत्कंठया पृष्टः । कश्चिन्निश्चिनधीर्जगौ

---

न सारुं नथी. ॥ ७१ ॥ ते धैर्यवान मुनिजने धन्य छे के जेओ शीलरूपी बखतरथी शोभी रहेला छे, अने तेथी स्त्रीना वचनोरूपी बाणो तेओना हृदयने भेदी शकता नथी. ॥ ७२ ॥ खरेखर ते कुटणी मारी गुरु थइ छे, के जेणीनी आ शिक्षा याद करीने हुं फरीथी वेश्याओना वचनपाशमां पडीश नहि. ॥ ७३ ॥

हवे घेर जइने हुं मारां संबंधिओनी तपास करुं, एम विचारी नगरमां जइ ते पोताना महेलने बारणे आव्यो. ॥ ७४ ॥ शुं अहिं कल्याणना स्थानसरखा सुरेंद्रदत्त अने सुभद्रा छे? एवी रीते तेणे उत्कंठापूर्वक पूछ्याथी कोइक बुद्धिवान माणसे तेने कह्युं के, ॥ ७५ ॥ हे शांतवेष-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ १५ ॥ प्रश्नो देशांतरे शांत—वेष वक्त्येष ते स्थितिं ॥ जगत्प्रतीतमप्येत—च्चेन्न जानासि तच्छृ-
णु ॥ १६ ॥ वार्द्धकेऽभूत्सुरेंद्रस्य । सूनुः क्लेशेन धम्मिल्लः ॥ ययौ स यौवने दैव—वैवश्याद्गणिकागृहं
॥ १७ ॥ तत्रानंगोरगापेत—चेतनः स चिरं स्थितः ॥ पित्राहूतोऽपि नायासीत् । प्राप्तसंयमधीरिव ॥
॥ १८ ॥ विपन्नौ पितरौ तस्य । व्ययाच्च निष्ठितं धनं ॥ गता विक्रीय वेश्मेदं । तद्वधूः सविधे पि-
तुः ॥ १९ ॥ सतोऽसतो वा को वेत्ति । शुद्धिं तस्याद्य पाप्मनः ॥ कुलप्रलयकाले हि । जायंत्ये-

---

वाळा! आ तारो प्रश्न तुं देशांतरमां रहेनो होय एम सूचवे छे, हवे दुनियामां प्रसिद्ध एवा आ
वृत्तांतने जो तुं नथी जाणतो तो सांभळ? ॥ १६ ॥ सुरेंद्रदत्तशेठने तेनी वृद्धावस्थामां केटलेक
कष्टे एक धम्मिल्ल नामे पुत्र थयो हतो, परंतु कर्मयोगे यौवनवयमां ते वेश्याने घेर गयो. ॥१७॥
त्यां कामदेवरूपी सर्पना दंशथी निश्चेतन थइने ते घणा काळसुधी रह्यो, तथा जाणे चारित्रनी
बुद्धिवाळो थयो होय नहि तेम तेना मातपिताए बोलाव्या छतां पण ते पाछो आव्यो नहि. ॥
॥ १८ ॥ पछी तेना ते माबाप गुजरी गयां, तथा तेना खरचथी धन पण खूटी गयुं, अने ते ध-
म्मिल्लनी स्त्री आ घर वेचीने पोताना पिताने घेर गइ. ॥ १९ ॥ ते दुष्ट पुत्र हवे छे के नहि

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वंविधाः सुताः ॥ ८० ॥ अथ पित्रोः श्रुते मृत्या—वत्याकुलितमानसः ॥ शंपासंपातसंकाशं । व-
हन् दुःखमचिंतयत् ॥ ८१ ॥ स्वां कीर्त्तिमपि शृण्वंतो । लज्जंते केचिदुत्तमाः ॥ स्वामकीर्त्तिं स्वक-
र्णाभ्यां । शृण्वतोऽपि न मे त्रपा ॥ ८२ ॥ यथायं तद्वदन्योऽपि । परोक्षे मे तनिष्यते ॥ दुर्यशः
सकलो लोको । धिग् धिग् मां कुलपांसनं ॥ ८३ ॥ आसंसारं ध्वनत्येव—मकीर्त्तिपटहे पटु ॥ ही
वज्रहृदयो नोर्ध्व—शोषं शुष्यति धम्मिलः ॥ ८४ ॥ पितरौ मे विपेदाते । मद्वियोगेऽपि वत्सलौ ॥

---

एम तेनी शुद्धि पण कोण जाणे छे? वळी कुलना विनाशसमये एवा पुत्रो पेदा थाय छे. ॥८०॥
हवे पोताना मातपितानुं मरण सांभळवाथी अत्यंत व्याकुल मनवाळो धम्मिल वीजळी पडवासरखुं
दुःख धारण करतोथको विचारवा लाग्यो के. ॥ ८१ ॥ केटलाक उत्तम मनुष्यो पोतानी कीर्ति
सांभळीने पण लज्जा पामे छे, त्यारे पोतानेज काने पोतानी अपकीर्ति सांभळतां छतां पण मने
लज्जा थती नथी. ॥ ८२ ॥ जेम आ माणस तेम बीजा पण सघळा लोको परोक्ष मारी अपकी-
र्ति विस्तारशे, माटे कुलमां अंगारासरखा एवा मने धिक्कार छे! धिक्कार छे! ॥ ८३ ॥ आ समस्त
संसारमां आवी रीते मारो अपकीर्तिनो पटह वागतां छतां पण वज्रसरखा मनवाळो आ हुं धम्मि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्राः काठिन्यं तयोर्मृत्या—वपि ज्ञाते श्वसिम्यहं ॥ ८५ ॥ मृगनाभिर्मृगोच्छित्यै । मौक्तिकं शुक्ति-
काभिदे ॥ फलं रंभानिशुंभाय । तथाहं जनकभिदे ॥ ८६ ॥ मरुदेशं मरालीव । महाभागा य-
शोमती ॥ मां प्राप्य नीरसं नाथं । न लेभे जातु निर्वृतिं ॥ ८७ ॥ संचिक्ये पूर्वजैर्लक्ष्मी—र्या
कष्टं कणराशिवत् ॥ स्वादं स्वादं क्षयं निन्ये । मूषकेणेव सा मया ॥ ८८ ॥ यन्मे पित्राश्रितं सिं-

---

ल अरेरे! ऊभो ऊभो शोषाइ पण जतो नथी! ॥ ८४ ॥ मारा वहाला मातपिता मारा वियो-
गथी मृत्यु पाम्या, अने अरे! मारुं हृदय केवुं कठण छे के तेओनुं मृत्यु जाण्या छतां पण हजु
हुं जीवुं छुं! ॥ ८५ ॥ जेम कस्तूरी हरणनो नाश करे छे, मोती छीपनो नाश करे छे तथा केळ-
नां फळ जेम केळनो नाश करे छे, तेम में पण मारा मातपितानो नाश कर्यो छे. ॥ ८६ ॥ मरु-
देश पामीने जेम हंसणी तेम महाभाग्यवाळी यशोमती मारा जेवा नीरस भर्तारने पामीने कोइ
पण समये सुख पामी नहि. ॥ ८७ ॥ मारां पूर्वजोए कष्टथी धान्यना ढगलानीपेठे जे लक्ष्मी ए-
कठी करी हती ते में उंदरनीपेठे खाइ खाइने खूटाडी. ॥ ८८ ॥ मारा जे घररूपी गुफामां सिं-
हसरखा मारा पिता रहेता हता, ते घरमां आजे अरेरे! कोइक घुवडनीपेठे अन्य मनुष्यो वि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हे—नेव मंदिरकंदरं ॥ ही तत्र विलसंत्यद्य । केऽप्यन्ये द्रवा इव ॥ ७९ ॥ खद्योतो द्युतिमत्सु काचशकलं रत्नेष्वगेषु स्नुही । मेषो योध्धृषु खेचरेषु मशको ज्ञारकमेषूंदिरः ॥ प्रेतो नाकिषु गोष्पदं जलधिषु स्थानेषु नाकुर्यथा । तद्वज्जातिविर्म्बनाय विहितो धात्रा मनुष्येष्वहं ॥ ८० ॥ केचिज्जीवंति जीवंतो । म्रियंते च मृताः पुनः ॥ मृता अप्यपरे जीवं—त्यहं जीवन्मृतः पुनः ॥ ८१ ॥ अतःपरमयुक्ता त—त्कदाशा जीवितस्य मे ॥ प्राणैरमीभिः पर्याप्त—मपवादमलीमसैः ॥ ८२ ॥

---

लसी रह्या छे! ॥ ७९ ॥ तेजवंतोमां जेम खद्योत, रत्नोमां जेम काचनो टुकडो, वृक्षोमां जेम थोर, सुभटोमां जेम घेटो, पक्षीओमां जेम मछर, मजुरोमां जेम उंदर, देवोमां जेम प्रेत, समुद्रोमां जेम खाबोचीउं तथा मकानोमां जेम बिल तेम फक्त जातिनी निंदामाटे विधाताए मने मनुष्योमां पेदा कर्यो छे. ॥ ८० ॥ केटलाक जीवताथका जीवे छे, अने मुआबाद मुएला गणाय छे, तथा बीजा केटलाक मुआ छतां पण जीवे छे, अने हुं तो जीवते मुआजेवो थयो छुं. ॥ ८१ ॥ हवेथी मारे जीववानी खोटी आशा करवी ते अयुक्तज छे. केमके अपवादोथी मलीन थयेला आ प्राणोथी हवे सर्युं. ॥ ८२ ॥ अरे नीच जीव! तुं हजु शामाटे बेठो छे? अरे प्राणो! तमो ज-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्थितोऽसि जीव किं क्लीव । प्राणा व्रजत सत्वरं ॥ प्राणानां मार्गदानाय । भव रे हृदय द्विधा ॥
॥ ७३ ॥ एवं विकल्पसंदोहै-र्दधानो मृत्युसाहसं ॥ जाताऽशुकनवक्रेह-द्वारादेवाववलिष्ट सः ॥७४॥
युग्मं ॥ शुष्यद्द्रुमगणं व्रश्य—त्कूपं जीर्यन्महीरुहं ॥ ययौ बहुबिलं नाकु—संकुलं स जरद्वनं ॥
॥ ७५ ॥ तत्र निर्मुक्तसंसार-सुखाशो मरणाग्रही ॥ कृपाणं निजपाणिस्थ—मभ्यधादिभ्यनंदनः ॥
॥ ७६ ॥ गतं धनं गता भार्या । गतस्तंत्रो गतं गृहं ॥ स्वामिभक्त त्वमेवासि । मम संनिहितोऽ-

---

लदी चाल्या जाओ? वळी हे हृदय! तुं पण प्राणोने मार्ग आपवामाटे चीराइने बे टुकडा थइ जा? ॥ ७३ ॥ एवी रीतना विकल्पोना समूहोथी मृत्युना साहसने धारण करतोथको ते धम्मिल जाणे अपशकुन थयुं होय नहि तेम ते घरने बारणेथीज पाछो वळ्यो. ॥ ७४ ॥ पछी ते सुका-ती वेलडीओना समूहवाळां, पडी जता कुवावाळां, जीर्ण थतां वृक्षोवाळां, घणां दरोवाळां तथा उंदरोथी भरेलां एवां एक जीर्ण वनमां गयो. ॥ ७५ ॥ त्यां संसारसुखनी आशा छोडीने मर-वामाटे तैयार थयेलो शेठनो पुत्र ते धम्मिल पोताना हाथमां रहेलां खड्गने कहेवा लाग्यो के, ॥ ७६ ॥ धन गयुं, स्त्री गइ, व्यापार गयो, घर गयुं, परंतु हे स्वामिभक्त खड्ग! हवे तो तुंज ए-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धुना ॥ ९७ ॥ तदेहि कंठपीठे मे । परिरभ्य दृढं पृणु ॥ चिरचिंतितमापन्न—मित्रमृत्युमनोरथं ॥
॥ ९८ ॥ वणिग्योगाद्रणे वैरि—वारणेऽनुपयोगिनः ॥ भवतादवतारस्ते । दैवादेवं फलेग्रहिः ॥९९॥
निस्त्रिंशोऽसि वधे पत्यु—र्मा शंकिष्ठ मनागपि ॥ अनुशिष्येति सोऽकुंठं । कंठे खड्गमवाहयत् ॥
॥ १००० ॥

तदा तं पवनोध्धूत—पत्रपाणिप्रकंपनैः ॥ न्यवारयन्निव जर—त्तरवो मृत्युसाहसात् ॥ १ ॥

---

क मारो नजीकनो संबंधी छे, ॥ ९७ ॥ माटे तुं आव? अने मारा कंठने खूब भेटीने घणा वख-
तथी चिंतवेलो तथा दुःखीजनना मित्रसरखो मारो मृत्युनो मनोरथ तुं सफल कर? ॥ ९८ ॥ दै-
वयोगे तने वणिकनो संग थवाथी रणसंग्राममां वैरीजनने निवारवामां तुं उपयोगी थइ शक्यो न-
थी, परंतु आजे आवी रीते तारो अवतार फलीभूत थाओ? ॥ ९९ ॥ तुं निस्त्रिंश एटले निर्दय
छो, माटे स्वामीना वधमाटे तारे जरा पण शंका करवी नहि, एम कहीने अटकावविना तेणे पो-
ताना कंठपर तलवार चलावी. ॥ १००० ॥

ते वखते पवनथी कंपेलां पत्रोरूपी हाथ हलावीने जीर्ण वृक्षो तेने मृत्युना साहसथी जाणे

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अव्यक्तवचनत्वात्ते । निषेधयितुमक्षमाः ॥ जहुरास्यात्कुशग्रासान् । हरिण्योऽप्यार्द्रदृष्टयः ॥ २ ॥ सं-
भूय तुमुलं व्योम्नि । तन्वंतस्त्यक्तचूणयः ॥ पक्षिणोऽपि क्षणं जाता-स्तं दृष्ट्वा दुःखभाजनं ॥ ३ ॥
हहासौ श्रीमतः सूनु-रसमाप्तमनोरथः ॥ विधास्यति विपद्याद्य । वनं हत्यापवादि मे ॥ ४ ॥ इत्यु-
ल्लसितकारुण्या । मातेव वनदेवता ॥ कदलीदलवत्तस्य । मृदुधारं व्यधादसिं ॥ ५ ॥ सर्वथा जी-
वितोद्विग्न—श्चिताग्नौ सोऽविशत्ततः ॥ चितां च शीतलीचक्रे । क्रीडावापीमिवामरी ॥ ६ ॥ माथि-

---

अटकाववा लाग्यां. ॥ १ ॥ अवाचक होवाथी तेने निषेधवाने असमर्थ एवी हरिणीओ पण
आंखोमां आंसु लावीने पोताना मुखमांथी घासना ग्रासोने तजवा लागी. ॥ २ ॥ वळी तेने जो-
इने आकशमां एकठा थइने कीकीयारी करता पक्षीओ पण चण तजीने क्षणवार दुःख अनुभव-
वा लाग्यां ॥ ३ ॥ अरे आ धनवाननो पुत्र मनोरथ संपूर्ण थयाविना आजे आपघात करीने मा-
रुं वन हत्याना अपवादवाळुं करशे ॥ ४ ॥ एम विचारी दया लावीने मातानीपेठे वनदेवताए ते-
नी तलवार केळना पत्रजेवी कोमळ धारवाळी करी. ॥ ५ ॥ पछी ते धम्मिल जीववाथी बिलकुल
कंटाळीने चितानी अग्निमां पेठो, त्यारे ते देवताए ते चिताने क्रीडा करवानी वावसरखी शीतल

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जमाटे क्रीडा करवाना दडासरखी छे मनुष्योनी तुंबडीओ ज्यां, तथा एक कलेवर लेवावाटे पितराइ-
योनीपेठे आचरण करता छे राक्षसो जेमां, ॥ १५ ॥ कापालिक योगीओए मंत्रसिद्धिमाटे मुरदां-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निरसुवर्ष्मसु ॥ ध्रियमाणेषु तन्नाशैः । फेरण्डैः कृतविड्वरं ॥ १६ ॥ पारे पुरमसौ सत्व—संगतः स-
त्वरं गतः ॥ प्राप प्रेतवनं रंक–करंकशतसंकुलं ॥ १७ ॥ त्रिभिर्विशेषकं ॥ आगच्छागच्छ वत्सेति—
वादिने प्राप्तपूर्विणे ॥ तत्रात्तहोमविधये । योगिने समगंस्त सः ॥ १८ ॥ योगी तं स्माह मन्मंत्र–
सिद्धिस्तव वशंवदा ॥ इन्द्राकारभिक्षाका । एव शिष्या अमी मम ॥ १९ ॥ स स्माह यूयं मा
भैष्ट । विघ्नेभ्यो मयि रक्षके ॥ स्वाधीने गरुडास्त्रे किं । भवेद्भौजंगमं भयं ॥ २० ॥ कुमारं दिशि

---

जने लेइ लेवाथी निराश थयेला शियाळीयाओना पोकारवाळुं ॥ १६ ॥ तथा सेंकडोगमे रंकोना
मुडदांओथी भरेलुं एवुं नगरनी बहार रहेलुं जे प्रेतवन तेमां ते हिम्मतवान राजकुमार तुरत गयो.
॥ १७ ॥ वत्स ! आव आव ? एम कहेता तथा हवननो सरंजाम लेइने तेनी पहेलांज त्यां गयेला
एवा ते भैरवनाथ योगीने ते मळ्यो. ॥ १८ ॥ पछी योगीए तेने कह्युं के मारा मंत्रनी सिद्धि तारे
आधीन छे, आ मारा शिष्यो तो इंद्रनो वेष धरनारा भिखारीसरखाज छे. ॥ १९ ॥ त्यारे गुणव-
र्मा कुमार बोल्यो के ज्यांसुधि हुं उत्तरसाधक छुं त्यांसुधि तमारे विघ्नोथी डरवुं नहि, केमके जो
गरुडास्त्र स्वाधीन होय तो पछी सर्पनो भय शुं होइ शके ? ॥ २० ॥ पछी ते योगीराजे उत्तर-

P.P. Ac. Gunratnasuri M.S.        Jun Gun Aaradhak Trust

कौबेर्यां । करवालकरं ततः ॥ योगी तिसृषु काष्टासु । शिष्यांश्च त्रीनतिष्टपत् ॥ २१ ॥ स्वयं च मंडलं कृत्वा । शबमंतर्न्यवेशयत् ॥ अज्वालयच्च ज्वलनं । तस्य कुंड इवानने ॥ २२ ॥ अनुच्चमुच्चरन् मंत्रं । स्वतंत्रोऽत्र जुहाव सः ॥ पुष्पाणि करवीरस्य । गुटिका गुग्गुलस्य च ॥ २३ ॥ तं ततः शाकिनीरक्षो—भूतोद्भूता बिभीषिका ॥ वात्या इवाचलं पादैः । समं शिष्यैर्न डुढुवुः ॥ २४ ॥ घोरघोषोऽथ निर्घात—स्तस्याग्रे सहसाऽभवत् ॥ ब्रह्मांडभिद्गिरिभ्रंश—वज्रपातसहोदरः ॥ २५ ॥

---

दिशामां हाथमां तलवारसहित ते राजकुमारने, तथा बीजी त्रण दिशाउमां पोताना ते त्रण शिष्योने स्थाप्या, ॥ २१ ॥ अने पोते मंडल करीने तेनी अंदर ( मनुष्यनुं ) एक शब राख्युं, तथा जेम कुंडमां तेम ते शबना मुखमां तेणे अग्नि सळगाव्यो. ॥ २२ ॥ पछी धीमे धीमे मंत्रनो उच्चार करतो ते स्वतंत्र योगी तेनी अंदर कणेरनां पुष्पो तथा गुगळनी गोळीउ होमवा लाग्यो. ॥ २३ ॥ ते वखते शाकिनी राक्षस तथा भूतोथी उत्पन्न थयेलो डर, वायु जेम मेखलासहित पर्वतने तेम शिष्योसहित तेने उपद्रव करी शक्यो नहि. ॥ २४ ॥ एवामां अचानक तेनी आगळ ब्रह्मांडने फोडी नाखे एवो, तथा पर्वतने तोडवामाटे करेला वज्रपातसरखो भयंकर अवाजवा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

शिष्येषु तेन बाधिर्य । लंभितेषु धरातलं ॥ वक्षःस्थलं वियोगिन्या । इवाकस्माद्व्यदीर्यत ॥ २६ ॥
रंध्रादाविरभूत्तस्मा—द्बिलादिव महोरगः ॥ दवदेश्यशिरःकेश—स्तुद्दग्नेत्रनाशिकः ॥ २७ ॥ अ-
ग्निज्वालाकरालास्य-कुहरः क्रोडदंष्ट्रिकः ॥ भग्नकुंभकपालाभ-गंडः करभकंधरः ॥ २८ ॥ अलिंज-
रोदरस्ताल—बाहुः शैलतटीकटिः ॥ उदूखलपदः कोऽपि । वेतालः क्रूरदर्शनः ॥ २९ ॥ तिग्मि-
र्विशेषकं ॥ तेन दुष्टेन दृष्टेन । सर्वेऽप्युत्तरसाधकाः ॥ त्रेसुर्विना कुमारेंद्रं । मार्जारेणेव मूषकाः ॥

---

ळो निर्घात थयो. ॥ २५ ॥ ते अवाजथी ते वणे शिष्यो बहेरा थइ गये छते वियोगिनी स्त्रीनुं
जेम वक्षःस्थल तेम अकस्मात पृथ्वीनुं तल फाट्युं. ॥ २६ ॥ हवे बिलमांथी जेम सर्प तेम ते बा-
कोरामांथी दवानलसरखा मस्तकना केशोवाळो, बिलाडासरखी आंखोवाळो, छुंगळसरखा नाकवा-
ळो, ॥ २७ ॥ अग्निज्वालाथी भयंकर मुखरूपी कोतरवाळो, डुक्करसरखी दाढोवाळो अने भांगेला
घडानी ठीबडीसरखा गालवाळो तथा ऊंटसरखी गरदनवाळो, ॥ २८ ॥ कोठीसरखा पेटवाळो,
ताडसरखा हाथवाळो, पर्वतनी मेखलासरखी केडवाळो, तथा खांडणीआसरखा पगवाळो भयंकर
देखावनो कोइक वेताल प्रकट थयो. ॥ २९ ॥ ते दुष्टने जोवाथीज बीलाडाथी जेम उंदरो तेम

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धम्मि-
सार्थं
२६७

॥ ३० ॥ गुरुमुद्गरमुद्गीर्य । योगिनं निजगाद सः ॥ बलेन कस्य मद्भूमौ । मंत्रं साध्नोषि रे वद ॥ ३१ ॥ भविता मामनाराध्य । मंत्रसिद्धिः कथं तव ॥ परभूमौ विशन् श्वेव । लप्स्यसे प्रत्युतापदं ॥ ३२ ॥ यावत्तद्वचनैस्त्रास—करैः क्षुभ्यति योगिराट् ॥ कृपाणं नर्त्तयन् पाणौ । तावदूचे नृपात्मजः ॥ ३३ ॥ अहो मम बलादेष । मंत्रं साध्नोत्यहं पुनः ॥ न क्षुभ्ये वह्निवद्वंश—त्राटकारैर्वचनैस्तव ॥ ३४ ॥ यदि त्वं सांयुगीनोऽसि । तद्ढौकस्व मया युधे ॥ योगी निद्राचरस्तस्य । तुदने किं

---

ते गुणवर्मा कुमारशिवाय ते सघला उत्तरसाधको त्रास पाम्या ॥ ३० ॥ पछी ते वेताल एक मोटुं मुद्गर उगामीने योगीने कहेवा लाग्यो के, अरे! बोल के मारी भूमिमां कोना बलथी तुं मंत्र साधे छे? ॥ ३१ ॥ वळी मने आराध्याविना तारी मंत्रसिद्धि केम थशे? परनी भूमिमां दाखल थवाथी उलटो कुतरानीपेठे तुं आपदा पामीश. ॥ ३२ ॥ पछी जेवामां त्रास करनारां तेनां ते वचनोथी ते योगीराज त्रास पामे छे, तेवामां हाथमां तलवार नचावतोथको ते गुणवर्मा कुमार बोल्यो के, ॥ ३३ ॥ अरे प्रेत! आ योगीराज मारा बलथी मंत्र साधे छे, अने हुं तारा वांसना तडाकासरखां वचनोथी अग्निनीपेठे क्षोभ पामुं तेम नथी. ॥ ३४ ॥ वळी जो तारी लडवानी इच्छा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यशस्तव ॥ ३५ ॥ अयं खड्गरविः शत्रु—नेत्रकैरवभैरवः ॥ स्थितो मे पाणिपूर्वाद्रौ । त्वां तमिस्र-मिवार्दितुं ॥ ३६ ॥ स प्रोचित्रानहो बाल । कस्त्वया सह विक्रमः ॥ परार्थे मा वृथा याहि । फलं भज नृजन्मनः ॥ ३६ ॥ कुमारः स्माह नो बाल । इति मां मावजीगणः ॥ सिंहः शिशुरपि प्रौढं । किमु हंति न हस्तिनं ॥ ३७ ॥ लघुर्दीपो गुरु ध्वांतं । लघु वज्रं गुरुर्गिरिः ॥ लघुः पर्शुर्गुरुर्वृक्षो । वद कः केन जीयते ॥ ३८ ॥ यः परार्थः स हि स्वार्थः । स्वार्थः कोऽस्त्यपरः सतां ॥ को मेघ-

---

होय तो मारी साथे युद्ध कर? आ योगी तो भिक्षाचर छे, तेने दुःख देवाथी तारो शुं यश थ-वानो छे? ॥ ३५ ॥ शत्रुजनना नेत्रोरूपी कैरवोने भय पमाडनारो आ मारो खड्गरूपी सूर्य अंध-कारसरखा तने नष्ट करवामाटे मारा हाथरूपी पूर्वाचलमां उदय पाम्यो छे. ॥ ३६ ॥ त्यारे ते प्रेत बोल्यो के अरे! तुं तो हजु बालक छे, तारीसाथे बळ करवुं शा कामनुं छे? फोकट परने माटे तुं मर नहि, अने मनुष्यजन्मनुं फल भोगव? ॥ ३६ ॥ त्यारे कुमार बोल्यो के अरे! बालक कही-ने तुं मारी अवगणना न कर? केमके सिंहनुं बच्चुं पण शुं मोटा हाथीने मारतुं नथी? ॥३७॥ दीपक लघु छे अने अंधकार महोटो छे, वज्र नानुं छे अने पर्वत महोटो छे, कुहाडी नानी छे

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्यापरः स्वार्थो । जगदुज्जीवनं विना ॥ ३९ ॥ परोपकरणात्पुण्य—यशसी पेशलं फलं ॥ फलं धनांगनारंगाः । फल्गु मानुष्यभूरुहः ॥ ४० ॥ यद्वोक्त्वालं स्वशक्तीडा । व्रीडाहेतुर्महात्मनां ॥ शूरोऽसि चेत्पुरस्तिष्ठ । फले व्यक्तिर्भविष्यति ॥ ४१ ॥ कुमारस्येति सत्वोक्त्या । विस्मितात्मा स निर्जरः ॥ बभूव नटवत्त्यक्त—दुर्वेषो दिव्यरूपभाक् ॥ ४२ ॥ ऊचे च धीर तुष्टोऽस्मि । तव सत्त्वाद्वरं

अने वृक्ष महोटुं छे, परंतु कहे के कोण कोने जीते छे? ॥ ३८ ॥ वळी जे परार्थ छे तेज स्वार्थ छे, सज्जनोने तेना शिवाय बीजो कयो स्वार्थ छे? केमके जगतने जीवितदान आपवाशिवाय मेघनो बीजो कयो स्वार्थ छे? ॥ ३९ ॥ पुण्य अने यश ए परोपकारनुं मनोहर फल छे, तेमज धन अने स्त्रीना भोगविलास ए मनुष्यजन्मरूपी वृक्षनां नकामां फल छे. ॥ ४० ॥ अथवा वधारे कहेवाथी सर्युं, केमके पोतानी शक्तिनी जे स्तुति करवी ते महात्माओने लज्जा करनारुं छे, माटे जो तुं शूरो होय तो मारी सामे आवीने उभ के जेथी प्रगट फल जणाशे. ॥ ४१ ॥ एवी रीतनां कुमारनां हिम्मत भरेलां वचनथी विस्मय पामेलो ते देव नटनीपेठे पोतानो भयंकर आकार तजीने दिव्य रूप धरनारो थयो. ॥ ४२ ॥ पछी ते बोल्यो के हे धीर! तारी हिम्मतथी हुं तुष्टमा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वृणु ॥ सोऽप्यवग्योगिनोऽमुष्य । तत्पूरय समीहितं ॥ ४३ ॥ देवोऽवादीन्मया मंत्र—सिद्धिस्तस्य कृतैव नोः ॥ त्वं वदस्व प्रियं किंचि—दमोघं देवदर्शनं ॥ ४४ ॥ कुमारः स्माह यद्येवं । देव तद्वद मे प्रिया ॥ धत्ते हेतोः कुतः शीलं । स्नेहलापि युवत्यपि ॥ ४५ ॥ अवधिज्ञानतो बुध्वा—ऽप्यधत्त विबुधस्ततः ॥ पश्य प्राभातिकं लग्न—मेतत् प्राच्यामुदित्वरं ॥ ४६ ॥ अयं निशावसानोत्थ—घटिकाघातनिःस्वनः ॥ शक्तिवेधमिवाधत्त । नारीषु स्वैरिणीषु च ॥ ४७ ॥ विज्ञाय सूरमायांत—

---

न थयो छुं, माटे तुं वर माग? त्यारे कुमार बोल्यो के जो एम छे तो आ योगीनी इच्छा तुं संपूर्ण कर? ॥ ४३ ॥ त्यारे देवे कह्युं के हे कुमारेंद्र! मैं तेनी मंत्रसिद्धि करी आपीज छे, हवे तुं पण कंइंक इच्छित माग? केमके देवदर्शन निष्फल होय नहि. ॥ ४४ ॥ हवे कुमार बोल्यो के जो एम छे तो हे देव! तुं कहे के मारी स्त्री ( माराप्रते ) स्नेहवाळी तथा युवावस्थावाळी छे, छतां ते शामाटे शील धारण करे छे? ॥ ४५ ॥ त्यारे ते देव अवधिज्ञानथी जाणीने बोल्यो के तुं जो? आ प्रभातकाळनुं लग्न पूर्व दिशामां उगवानी तैयारीमां छे. ॥ ४६ ॥ आ परोढीयानी घडीयालना टकोरानो अवाज स्वेच्छाचारी स्त्रीओना मर्मस्थानोने भेदी नाखे छे. ॥ ४७ ॥ वळी आ

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

ममी निर्वसुम्बराः ॥ पलायनाय विरली—भवंति व्योम्नि तारकाः ॥ ४८ ॥ तज्जातेयं गतप्राया । क्षपा स्त्रीवत्त्रपातुरा ॥ बहुकालोपदेश्यं त—द्यत्पृच्छति भवान् पुनः ॥ ४९ ॥ तदेतमंजनं यौगं । गृहीत्वा स्वगृहं व्रज ॥ अनेनादृश्यमूर्त्तिस्ते । सर्वं साक्षाद्भविष्यति ॥ ५० ॥

इत्युदित्वा सुरो दत्वा । तस्यादृश्यांजनं ययौ ॥ कृतकृत्यः कुमारोऽपि । ननामोपेत्य योगिनं ॥ ५१ ॥ जगौ सगौरवं योगी । वत्स त्वत्संगतेर्गतः ॥ साफल्यं मे श्रमो मंत्र-साधनस्याष्टवार्षिकः

---

सूर्यने ( शूरा सुभटने ) आवतो जोइने तेजना आडंबरविनाना ताराओ आकाशनी अंदर नाशवामाटे छुटवछुट थइ जाय छे. ॥ ४८ ॥ माटे आ रात्री स्त्रीनीपेठे लज्जातुर थइथकी नष्टप्राय थयेली छे, अने तुं जे पूछे छे ते घणे वखते कही शकाय तेवुं छे. ॥ ४९ ॥ माटे आ यौगिक अंजन लेइने तुं तारे घेर जा? अने ते अंजनथी अदृश्य थइने ज्यारे तुं जोइश त्यारे तने सघळुं साक्षात देखाशे. ॥ ५० ॥

एम कहीने ते देव तेने अदृश्य करनारुं अंजन देइने गयो, तथा कृतार्थ थयेलो ते कुमार पण आवीने योगीने नम्यो. ॥ ५१ ॥ त्यारे ते योगी पण तेनुं सन्मान करीने बोल्यो के,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ५२ ॥ अहं तवोपकारस्या—ऽनृणः स्यां न कदाचन ॥ तत्किं करोमि किं स्तौमि । प्रियं किं
ते ददामि वा ॥ ५३ ॥ समस्ति चेत्प्रसत्तिस्ते । तत्काम्यं किमतः परं ॥ वदन्निति निशांतेऽगा—
न्निशांते नृपनूस्ततः ॥ ५४ ॥ अनुभूय क्षणं निद्रा–सुखमुन्मीलितेक्षणः ॥ बालातपनकाश्मीर—
लिप्तामिवैक्षत क्षितिं ॥ ५५ ॥ सहसा त्यक्ततल्पोऽथ । कृतप्राभातिकक्रियः ॥ जगाम धाम कनक
—वत्या अत्यादरेण सः ॥ ५६ ॥ समं तयैकतल्पस्य । तस्य गोष्टीं वितन्वतः ॥ तां दिदृक्षुरिव

---

हे वत्स! तारा सहायथी मारो आठ वर्षोसुधि साधेला मंत्रनो श्रम सफल थयो छे. ॥ ५२ ॥ व-
ळी हुं तारा उपकारना करजथी कोइ पण दिवसे मुक्त थइ शकुं तेम नथी, माटे हुं शुं करु?
शुं तारी स्तुति करुं? अथवा तने शुं प्रिय वस्तु आपुं? ॥ ५३ ॥ जो आपनी कृपा छे, तो पछी
तेथी बीजुं मारे शुं जोइये? एम कहीने परोढीए ते राजकुमार त्यांथी घेर गयो. ॥ ५४ ॥ त्यां
क्षणवार निद्रासुख अनुभवीने जेवामां ते आंख उघाडे छे तेवामां उगता सूर्यना तेजथी जाणे
केसरथी लींपायेली होय नहि एवी पृथ्वीने ते जोवा लाग्यो. ॥ ५५ ॥ पछी ते एकदम बिछानुं
छोडीने तथा प्रभातनी नित्यक्रिया करीने अत्यंत आदरमानपूर्वक कनकवतीने आवासे गयो. ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धम्मि- व्योम-मध्यमध्यास्त भास्करः ॥ ५७ ॥ अथ स्वावसथं प्राप्य । स्नात्वा भुक्त्वा समुच्छितः ॥ विजि-
सार्थं ज्ञासुः प्रियावृत्तं । कुमारश्चकमे निशं ॥ ५८ ॥ अहमस्मि त्रिजगतो-ऽप्यादृश्यीकरणक्षमा ॥ स्वस्यै-
व त्वमिति ज्योति-र्दम्भात्तमहसन्निशा ॥ ५९ ॥ चलचित्तोऽप्यसौ मित्र-गोष्ठीरंगं तरंगयन् ॥ ग-
२७३ ते यामे त्रियामाया । विससर्ज परिच्छदं ॥ ६० ॥ भूत्वा सिद्ध इवादृश्य-रूपः सिद्धांजनेन सः ॥

॥ ५६ ॥ त्यां एक बगीचापर बेसीने तेणीनी साथे ते वार्तांविनोद करवा लाग्यो, अने एम क-
रतांथकां जाणे तेणीने जोवामाटेज होय नहि तेम सूर्य आकाशना मध्य भागमां आव्यो. ॥
॥ ५७ ॥ पछी पोताने आवासे आवीने स्नान तथा भोजन करीने उठेलो ते गुणवर्मा कुमार पो-
तानी स्त्रीनुं वृत्तांत जाणवानी इछाथी हवे तुरत रात्रि थाय तो ठीक एम इछवा लाग्यो. ॥५८॥
हुं तो त्रणे जगतने अदृश्य करवाने समर्थ छुं. अने तुं तो फक्त पोतानेज अदृश्य करवाने सम-
र्थ छो, एम विचारी ताराओना मिषथी रात्रि तेनी हांसी करवा लागी. ॥ ५९ ॥ हवे ते कुमारे
उचक मनवाळा होवा छतां पण मित्रोसाथे वार्तांविनोद करीने रात्रिनो पहेलो पहोर गयाबाद
परिवारने विसर्जन कर्यो. ॥ ६० ॥ पछी ते सिद्धांजनथी सिद्धनीपेठे अदृश्य थइने हिम्मतथी

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सारं सत्वं कृपाणं चा—ऽमुंचन् पत्न्या ययौ गृहं ॥ ६१ ॥ निस्तंद्रश्चंद्रशालाया—मारुह्य विजने स्थि-
तः ॥ जाग्रतीं तां कुरंगाक्षी—मद्राक्षीद्दीपिकामिव ॥ ६२ ॥ जागर्त्येषा किमद्यापी—त्येकचित्ते नृपां-
गजे ॥ अतीये कियती रात्रि—रिति पप्रच्छ सा सखीं ॥ ६३ ॥ नभो निभाल्य साभाणीत् । क्षणः
सोऽभूद्विचक्षणे ॥ त्वर्यतां क्रियतां सार—शृंगारस्तत्र गम्यतां ॥ ६४ ॥ तां वीक्ष्याथ कृतस्नानां । स
र्वालंकार धारिणीं ॥ युगपत्कामकोपाभ्यां । कुमारो व्याकुलीकृतः ॥ ६५ ॥ अपास्य कामवैवश्य—

---

तलवार साथे लेइने पोतानी स्त्रीने आवासे गयो. ॥ ६१ ॥ त्यां ते प्रमादरहित अगासीपर च-
ढीने एकांते बेठो, ते वखते तेणे दीवीनीपेठे जागती एवी ते कनकवती मृगाक्षीने दीठी. ॥६२॥
केम आ हजुसुधी जागे छे? एम विचारी ते राजकुमार जेवामां एक चित्तथी जोया करे छे तेवा-
मां ते कनकवतीए पोतानी सखीने पूछ्युं के केटली रात्रि गइ छे? ॥६३॥ त्यारे तेणीए आका-
शतरफ जोइने कह्युं के हे विचक्षण ते वखत थइ गयो छे, माटे मनोहर शृंगार करो? अने
त्यां चालो? ॥६४॥ हवे तेणीने स्नान करेली तथा सर्वालंकारोथी शोभिती बनेली जोइने गुण-
वर्मा कुमार एकीहारे काम अने कोपथी व्याकुल थयो. ॥६५॥ पछी ते कामदेवनी व्याकुलता दो-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

मथासौ दध्यिवानिति ॥ धिग् योषा निखिला दोषा । इव घोरतमोमयीः ॥ ६६ ॥ अस्या अवगतं शील—स्वरूपं चेष्टयानया ॥ श्राद्धं दीपालिकायां चे—त्तत्संदेहः कुलस्य कः । ६७ ॥ मम ब्रह्मप्रतिज्ञाय । खेलत्येषा यथारुचि ॥ मृषावाक्सहजा स्त्रीणां । न्यग्गतिः सरितामिव ॥ ६८ ॥ तदेनामसिनानेना—ऽधुनैव करवै द्विधा ॥ यद्वा नेयमनिर्णीत—दुर्वृत्ता वधमर्हति ॥ ६९ ॥ एवं संवृतकोपेऽस्मि—न्नारूढा बलभीमसीः ॥ विमानं मंत्रसिद्धेव । हुंकारेणाचकर्ष सा ॥ ७० ॥ विमानं त-

डीने विचारवा लाग्यो के, अरे रात्रिनीपेठे घोर अंधकार ( अज्ञान ) वाळी सर्व स्त्रीओने धिक्कार छे. ॥ ६६ ॥ आवां आचरणथी तेणीना शीलनुं स्वरूप तो हवे जाणी लीधुं, जो दीवाळीने दिवसेज श्राद्ध होय तो पछी कुलना ( नाशनो ) संदेह शुं करवो? ॥ ६७ ॥ मने पोतानुं ब्रह्मचर्य जणावीने आ तो मरजीमुजब खेल्या करे छे, माटे नदीनी नीचाणमां जेम स्वाभाविक गति छे, तेम स्त्रीओनी पण मृषा वाणी स्वाभाविकज छे. ॥ ६८ ॥ माटे हमणाज तेणीना आ तलवारथी बे टुकडा करी नाखुं, अथवा तेणीना दुराचारनी खातरी कर्याविना मारवी ए योग्य नहि. ॥ ६९ ॥ एम विचारी कुमारे ज्यारे पोताना क्रोधने अटकाव्यो त्यारे ते कनकवतीए भयरहित

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्पुरः प्रादु-रासीदाशु वि[illegible]सुरं ॥ चलध्ध्वजभुजैर्नृत्य-दिव तद्रूपवीक्षणात् ॥ ७१ ॥ तत्र सख्या स-
हारूढां । कुमारोऽन्वारुरोह तां ॥ पथि नैकाकिनी योग्या । स्त्रीति नीतिं स्मरन्निव ॥ ७२ ॥ कि-
मितो यास्यति स्वर्ग-मेषा लेखैश्चिखेलिषुः ॥ किंवा वैताढ्यमत्याढ्य-विद्याधररिरंसया ॥ ७३ ॥ इ-
त्याद्यनल्पसंकल्प-तल्पस्थे गुणवर्मणि ॥ मणिरुग्मथितध्वांते । प्रतस्थे तन्नभोऽध्वनि ॥ ७४ ॥ वि-

---

अगासीपर चमीने मंत्रसिद्धनीपेठे हुंकारामात्रमांज एक विमानने खेंची लीधुं. ॥ ७० ॥ तुरतज देदीप्यमान तथा तेणीनुं रूप जोइने चालती पताकाओरूपी हाथोथी जाणे नाचतुं होय नहि तेम एक विमान तेणीनी पासे आवी उभुं. ॥ ७१ ॥ मार्गमां स्त्रीने एकली मोकलवी योग्य नहि एवी नीतिने जाणे याद करतो होय नहि तेम ते कुमार सखीसहित ते विमानपर चडेली कनकवतीनी पाछळ ( अदृश्यपणे ) चडी बेठो. ॥ ७२ ॥ शुं आ अहींथी देवोसाथे क्रीडा करवानी इछाथी स्वर्गमां जशे? अथवा महासंपत्तिवाळा कोइ विद्याधरनीसाथे क्रीडा करवानो इछाथी शुं वैताढ्यपर्वतपर जशे? ॥ ७३ ॥ एवी रीते अनेक प्रकारना संकल्पोरूपी बिछानामां गुणवर्मा कुमार बेसते छते मणिओनी कांतिथी दूर थयेल छे अंधकार जेमांथी एवा आकाशमार्गे ते

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मानं खर्वयन् मानं । मनसस्त्वरया ततः ॥ उत्तरस्यां विमानं त—द्ययौ किंचिन्महासरः ॥ १५ ॥ वनं तदा तदासन्नं । दासन्नंदनमाप्य तत् ॥ तस्थौ चिराध्वसंचार-परिश्रांतमिव स्वयं ॥ १६ ॥ विमानतः समुत्तीर्य । सा चचाल वनाध्वना ॥ पृष्ठस्थितः कुमारोऽपि । दंपत्योः किं पृथग्गतिः ॥१७॥ पुरः स जैनं भवनं । वनशृंगारमैक्षत ॥ स्फुरद्रत्नप्रभाऽपास्त-बह्यांतरतमोभरं ॥ १८ ॥ प्रियया पा-

विमान चालवा लाग्युं. ॥ १४ ॥ पछी पोताना वेगथी मनना प्रमाणविनाना वेगने पण जीततुं थकुं ते विमान त्यांथी उत्तर दिशामां कोइक महासरोवरप्रते गयुं. ॥ १५ ॥ त्यां नजीक रहेलां तथा नंदनवनने पण जीतनारां एवां एक वनमां जइने ते विमान घणो वखत मार्गे चालवाथी जाणे थाकी गयुं होय नहि तेम पोतानी मेळेज स्थिर थयुं. ॥ १६ ॥ हवे ते कनकवती विमानथी उतरीने वनने मार्गे चाली, तथा तेनी पाछल ते गुणवर्मा कुमार पण चाल्यो, केमके स्त्रीभरतारनी शुं जूदी गति होय? ॥ १७ ॥ आगल चालतां तेणे वनने शोभावनारुं तथा तेजस्वी रत्नोनी कांतिथी बहारना तथा अंदरना अंधकारना समूहने दूर करनारुं एक जिनमंदिर जोयुं. ॥ १८ ॥ पछी साथे रहेली स्त्रीसहित जिनमंदिरमां प्रवेश करतो एवो ते कुमार नवो परणेलो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रिपार्श्विकया । प्रविशन् जिनवेश्म सः ॥ वृत्तं स्वस्य नवोढस्या—ऽस्मरद्देवांगणाद्गणं ॥ ७९ ॥ तत्रानंदकरीमिंदु—करैरिव विनिर्मितां ॥ नत्वार्हत्प्रतिमां बाला । रंगमंडपमाप सा ॥ ८० ॥ तिस्रस्तत्रागताः कन्या । अन्या अपि तथा जिनं ॥ प्रणम्य तत्प्रतिच्छाया । इव तां परितः स्थिताः ॥८१॥ तत्रास्ति हस्तिभिः श्वेत—दंतीव परिवारितः ॥ खेचरैः खेचराधीशो । निविष्टोऽग्रे महाबलः ॥८२॥ निवेद्य ताश्चतस्रोऽपि । कन्यास्तस्मै स्वमागमं ॥ तस्थुः स्तंभानवष्टभ्य । स्वर्णपांचालिका इव ॥८३॥

---

पोते जाणे सजोड देववंदनमाटे जातो होय नहि एवा अवसरने ते याद करवा लाग्यो. ॥७९॥ त्यां जाणे चंद्रना किरणोवडे बनावी होय नहि एवी आनंद करनारी जिनप्रतिमाने नमीने ते कनकवती रंगमंडपमां आवी. ॥ ८० ॥ वळी त्यां आवेली बीजी त्रण कन्याओ पण तेवीज रीते जिनप्रतिमाने नमीने जाणे तेणीनी छायाओ होय नहि तेम तेणीनी आसपास बेठी. ॥ ८१ ॥ त्यां जेम अन्य हस्तीओसहित श्वेत हस्ती तेम विद्याधरोथी वींटायेलो एक महा बळवान विद्याधरोनो राजा आगळ बेठो हतो. ॥ ८२ ॥ पछी ते चारे कन्याओ तेने पोतानुं आगमन जणावीने जाणे सोनानी पुतळीओ होय नहि तेम स्तंभोने अठंगीने ऊभी. ॥ ८३ ॥ पछी अविछिन्न जळधाराथी

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चक्रे स्नात्रं जिनस्याथ । खेचरः सपरिच्छदः ॥ उत्पादयन्निव नवा । नदीर्नीरैर्निरंतरैः ॥ ८४ ॥ पूजाभेदैः समभ्यर्च्य । समग्रैः स जिनाधिपं ॥ कौतुकी नाट्यरंगाय । पुनः शिश्राय मंडपं ॥ ८५ ॥ तेनाद्य नाट्यावसरः । कस्या युष्मास्वितीरिते ॥ गुणवर्मवधूमेव । दर्शयांचक्रिरेऽपराः ॥ ८६ ॥ तदाज्ञया रयादात्त–चलना नलिनानना ॥ ननर्त्त तत्र सा रंभा । जंभारेरिव संसदि ॥ ८७ ॥ कन्या अन्याः क्रमात्ताल—वेणुवीणा अवीवदन् ॥ कः स्यादस्यां प्रनृत्यंत्या—मपरः खलु तौर्यिकः ॥

---

जाणे नवी नदीउ उत्पन्न करतो होय नहि तेम ते विद्याधरे जिनेश्वरप्रभुनुं स्नात्र कर्युं. ॥ ८४ ॥ पछी सर्व प्रकारनी पूजाथी जिनेश्वरप्रभुने पूजीने नाट्यरंगना कौतुकमाटे ते पाछो रंगमंडपमां आव्यो. ॥ ८५ ॥ तमारामांथी आजे नृत्य करवानो कोनो वारो छे? एम तेणे पूछवाथी ते बीजी कन्याउए गुणवर्मानी स्त्रीनेज देखाडी. ॥ ८६ ॥ पछी तेनी आज्ञाथी जलदी उठीने ते कमलसरखां लोचनवाळी कनकवती इंद्रनी सभामां जेम रंभा तेम त्यां नाचवा लागी. ॥ ८७ ॥ बीजी कन्याउ अनुक्रमे कांसीया वांसली तथा वीणा वगाडवा लागी, केमके आना नाचमां वळी वाजित्र वगाडनार बीजो कोण होइ शके? ॥ ८८ ॥ हवे नाटकना ध्वनिथी ते विद्याधरेंद्र ज्यारे

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ८८ ॥ विद्याधरेश्वरै नाट्य—ध्वनिधूनितमूर्द्धनि ॥ कंपमानवपुः कोपा—त्कुमारेंद्रो व्यचिंतयत् ॥ ८९ ॥ विडंबितोऽस्मि निर्बिडं । वेधसा मनुजेष्वहं ॥ ममापि नायिकाऽनायि । नर्त्तकीत्वमनेन यत् ॥ ९० ॥ न कौरव्यैः संवृतांग्या । यस्या मुखमपीक्षितं ॥ सर्वांगं वीक्षितं विद्या—भृतामद्योत्स-वोऽजनि ॥ ९१ ॥ बहुमेने सदास्माभिः । सर्वस्वस्वामिनीव या ॥ भ्रूपातेनैव सानेन । सर्वं दासी-व कार्यते ॥ ९२ ॥ यद्वा न्यषेधि यद्वाह्यै–रपि रात्रौ जिनार्चनं ॥ तदस्य कुर्वतः स्वैरं । ब्रूमः कि-

---

पोतानुं मस्तक धुणाववा लाग्यो, त्यारे कोपथी कंपित शरीरवाळो ते कुमारेंद्र विचारवा लाग्यो के ॥ ८९ ॥ अरे! विधाताए मने मनुष्योमां खूब वगोववाजेवुं कर्युं छे, केमके मारी स्त्रीने पण आ विद्याधरे पोतानी नटी बनावी छे. ॥ ९० ॥ ( वस्त्रोथी ) ढंकायेलां शरीरवाळी एवी जेणीनुं मुख पण कुरुवंशीओए जोयुं नथी, तेणीनां आजे आ सर्व अंगोने जोता एवा आ विद्याधरोने आ-नंद थाय छे. ॥ ९१ ॥ जेणीने में हमेशां मारी समस्त मील्कतनी मालिकसरखी मानेली छे, ते-णीनीपासे फक्त एक भृकुटीना इसाराथी आ विद्याधर दासीनीपेठे सघळुं कार्य करावे छे. ॥९२॥ अथवा अन्योए पण रात्रिए जिनपूजन निषेध्युं छे, ते जिनपूजन स्वेच्छाचारथी करनारा एवा आ

P.P. Ac. Gunratnasuri M.S.	Jun Gun Aaradhak Trust

धम्मि-सार्थं २८१

मविवेकिनः ॥ ८३ ॥ असिर्ममायमन्याय-मस्य मृष्येन्न निश्चितं ॥ भाविवृत्तांतजिज्ञासुः । स्यां
विघ्नाय न चेदहं ॥ ८४ ॥ ध्यायत्येवं कुमारेंद्रे । किंकिणी सहसाऽपतत् ॥ कांचीतः कांचनी त-
स्या । नृत्यधूनितवर्ष्मणः ॥ ८५ ॥ जग्राह तां समीपस्थः । कुमारः करलाघवात् ॥ खेटैरलक्षितो
नाट्य-रसनिःस्पंददृष्टिभिः ॥ ८६ ॥ भ्रष्टैकदंता दंतालि-रिव सालोकि मेखला ॥ नाट्यांते बा-
लया शून्यां—तराला किंकणीं विना ॥ ८७ ॥ विक्षितामपि यत्नेन । किंकिणीमनवाप्य सा ॥ पृ-

---

अविवेकी विद्याधरने शुं कहेवुं? ॥ ८३ ॥ वळी हवे थनारा वृत्तांतने जाणवानी इच्छावालो एवो-
हुं जो आ समये विघ्नरूप न होत तो मारी आ तलवार खरेखर आ विद्याधरना अपराधने सहन
करत नहि. ॥८४॥ जेटलामां ते कुमार एवी रीते विचारे छे तेटलामां नृत्यथी चलायमान थयेला
कनकवतीना शरीरपर पहेरेला कंदोरामांथी एक सोनानी घुघरी अचानक पडी गइ. ॥८५॥ त्या-
रे पासे रहेला ते कुमारे हाथचालाकीथी ते घुघरी लेइ लीधी तथा नृत्यना रसमां लीन दृष्टि-
वाला ते विद्याधरो तेने तेम करतां जोइ शक्या नहि. ॥ ८६ ॥ पछी नृत्य कर्याबाद वच्चे एक
दांत पडी जवाथी देखाती दांतोनी पंक्तिजेवी एक घुघरीविनानी वच्चे खाली देखाती पोतानी क-

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

ल्लंती खेचराधीशं । तेनैवं समजाप्यत ॥ ९८ ॥

गताद्य नूयसी रात्रि—र्गतास्ते खेचरा अपि । शुद्धिं कर्त्तास्मि किंकिण्याः । स्वस्रे स्वस्त्यस्तु तेऽधुना ॥ ९९ ॥ अथारुह्य विमानं त—दाश्रितं प्रेयसापि सा ॥ क्षणात्स्वस्थानमानंच । यानं च द्राक् तिरोदधे ॥ १३०० ॥ कुमारः प्राप्य धाम स्वं । सेवकैरप्यलक्षितः ॥ सुप्तोऽपि दुर्मना निद्रां । सस्वजे न प्रियामिव ॥ १ ॥ कोऽसौ खेटः क्वथमियं । तद्दशे वध्य एव सः ॥ इति ध्यायत ए-

---

ठीमेखला कनकवतीए दीठी. ॥ ९७ ॥ तेथी चीवटथी जोया छतां पण तेणीने ज्यारे ते न मळी त्यारे तेणीए तेसंबंधि विद्याधरने पूछवाथी तेणे कह्युं के—॥ ९८ ॥

हे बेहेन! आजे तो घणी रात्री गइ छे, तेम ते विद्याधरो पण गया, हुं तेनी तपास करीश, हमणा तो तुं जा? ॥ ९९ ॥ पछी ते कनकवती गुणवर्माए आश्रय करेला विमानपर चमीने क्षणवारमां पोताने स्थानके आवी, अने ते विमान पण तुरत अदृश्य थइ गयुं. ॥ १३०० ॥ हवे ते गुणवर्मा कुमार पोताने घेर गयो, आ बाबतनी तेना सेवकोने पण खबर नहोती, पछी ते उचक मने सुतो, परंतु पोतानी प्रियानीपेठे तेणे निद्राने आलिंगन आप्युं नहि. ॥ १ ॥ आ

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वास्य । वासतेयी व्यलीयत ॥ २ ॥ स्वीयवशा परवशा । द्वयमेतद्विरुध्यते ॥ इत्यब्जिनीप्रबोधेन । वदन्नुदितवान् रविः ॥ ३ ॥ मित्राय मंत्रिपुत्राय । दत्वा तां किंकिणीं रहः ॥ प्रगे प्रागवत्कुमारोऽगा—द्दयिताया निकेतनं ॥ ४ ॥ क्षणं विनोद्य वार्त्ताभिः । कुमारः सारिपाशिकैः ॥ पत्नीं प्रीत्या परमया । रमयामास रागभूः ॥ ५ ॥ निशावृत्तवशात्मासौ । स्वार्थैकध्यानयाऽनया ॥ पदक्रमगम-

---

विद्याधर कोण हशे? आ कनकवती केम तेने वश थइ हशे? ते विद्याधरने मारे मारवोज जोइये, इत्यादिक विचारतांज तेनी रात्रि व्यतीत थइ. ॥ २ ॥ पोताने जे वश होय ते परने पण वश होय, ए बन्ने बाबत तो (परस्पर) विरोधवाळी छे, एवी रीते कमलिनीने विकस्वर करवाथी जाणे कहेतो होय नहि तेम सूर्य उदय पाम्यो. ॥ ३ ॥ पछी पोताना मित्र मंत्रिपुत्रने गुप्तरीते ते घुघरी आपीने प्रभाते पूर्वनीपेठे ते गुणवर्मा कुमार पोतानी ते स्त्रीने घेर गयो. ॥ ४ ॥ पछी ते रागी थयोथको क्षणवारसुधि पोतानी पत्नीने वार्ताथी खुशी करीने परम प्रीतिथी सोगठांबाजीवडे रमाडवा लाग्यो. ॥ ५ ॥ रात्रिना वृत्तांतमां चिंतातुर बनेला तथा सोगठांनी चाल चलाववामां चतुर एवा पण ते कुमारने फक्त पोतानी बाजीमांज एकचित्तवाळी ते कनकवतीए जी-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

न्यास—चतुरोऽपि व्यजीयत ॥ ६ ॥ किंचिद्दत्वा फलं नाथ । व्यंजयस्व जयं मम ॥ अतः परं रि-
रंसुश्चेत् । तत्त्वं किमपि सारय ॥७॥ तया सोत्प्रासमित्युक्ते । कुमारः स्फारकैतवः ॥ किंचित्त्वांतिके
ऽस्तीति । सुहृदो मुखमैक्षत ॥८॥युग्मं॥ सोऽप्यूचे किंकिणीं मुक्त्वा । नान्यत्किंचिदिहास्ति मे ॥ सोऽ-
वक् तामेव मे देहि । यत्तयास्ति प्रयोजनं ॥९॥ सागरोऽथ कुमारस्य । किंकिणीमार्पयत्करे ॥ प्रत्यभि-
ज्ञाय तां दृष्ट—मात्रां साभूद् भृशाकुला ॥ १० ॥ इयं न वृश्चिकः किंतु । किंकिणी किं त्वमाकु-

---

त्यो. ॥ ६ ॥ हे स्वामी! मने कइंक फल आपीने मारी जीत प्रगट करो? अने हवे पछी पण
जो आप रमवाने चहाता हो तो कइंक शरत करो? ॥ ७ ॥ एवी रीते तेणीए जरा तमाकाबंध
कहेवाथी कपटक्रियामां चतुर एवा ते कुमारे पोताना मित्रसन्मुख जोइने कह्युं के तारीपासे कइं
वस्तु छे? ॥ ८ ॥ त्यारे ते पण बोल्यो के घुघरीविना बीजुं कइं अहीं मारीपासे नथी, त्यारे कु-
मार बोल्यो के तेज मने आप? केमके मारे तेनुंज प्रयोजन छे. ॥ ९ ॥ त्यारे ते सागर नाम-
ना मित्रे कुमारना हाथमां घुघरी आपी, त्यारे तेने जोतांज उळखी कहाडवाथी कनकवती अ-
त्यंत गभराटमां पडी. ॥ १० ॥ ( कुमार बोल्यो के ) आ कइं वींछी नथी, परंतु घुघरी छे, तुं केम

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ला ॥ तद्दीव्यं दूरेऽस्त्यद्यापि । प्रातराशक्षणोऽपि सः ॥ ११ ॥ तावदद्देव किं दत्से । किंकिणीयं म
मैव यत ॥ न हि भट्टारिका तोष्या । हूतैस्तन्मूर्त्तिगुग्गुलैः ॥ १२ ॥ हसित्वा भूपभूः स्माह । प्रिये
किमिदमुच्यते ॥ अमी वयमिदं राज्यं । सर्वमेतन्न किं तव ॥ १३ ॥ सा जगाद हसित्वाल—मत्र
तुभ्यं शपे प्रिय ॥ स्रस्ता क्वापि कटीसूत्रात् । किंकिणीयं ध्रुवं मम ॥ १४ ॥ यद्येवं देवि तद् ब्रूहि
। क्वासौ निपतिता तव ॥ इति पृष्टे कुमारेण । जगौ श्रीषेणनंदिनी ॥ १५ ॥ प्राग्जन्मवृत्तवन्नेत्र—

---

व्याकुल थाय छे? हजु रमत तो छेटी छे, तेमज प्राभातिक शिरामणीनो वखत पण हजु दूर छे. ॥ ११ ॥ त्यारे कनकवती बोली के हे स्वामी! आ ते शुं आपो छो? आ घुघरी तो मारीज छे, केमके भट्टारिका कंइ तेनीज मूर्तिनो गुगळ होम्याथी संतुष्ट थइ शकती नथी. ॥ १२ ॥ त्यारे राजकुमार हसीने बोल्यो के हे प्रिया! आ तुं शुं बोले छे? आ अमो तथा आ राज्य, ए सघळुं शुं तारुं नथी? ॥ १३ ॥ कनकवती बोली के हे स्वामी! हांसी करवाथी सर्युं, आ बाबतमां हुं आपना सोगन लेइने कहुं छुं के खरेखर आ मारी घुघरी मारा कंदोरामांथी क्यांक खरी पडी छे. ॥ ॥ १४ ॥ हे देवी! जो एम छे तो कहे के ते तारी घुघरी क्यां खरी पडी छे? एवी रीते कुमारे

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

नैतत्स्थानं स्मराम्यहं । स प्रोचे तर्हि पृछामुं । मित्रं मे गणिकोत्तमं ॥ १६ ॥ ज्ञानं विघटतेऽमुष्य
। नार्हद्वच इव क्वचित् ॥ मंक्ष्वसौ किंकिणीभ्रंश—भूमिं त्वां ज्ञापयिष्यति ॥ १७ ॥ एवं शठधिया
तेन । विप्रलब्धाभ्यधत्त सा ॥ किंकिणीयं क्व मे भ्रष्टा । वद कोविद देवर ॥ १८ ॥ सोऽपि जान-
न्नभिप्रायं । कुमारस्याब्रवीदिति ॥ दक्षे प्रातरिदं वक्ष्ये । ज्ञात्वा लग्नोपदेशतः ॥ १९ ॥ एवं विभ्र-
ममुत्पाद्य । तस्याः सरलचेतसः ॥ स्वस्थानं गुणवर्मा च । सागरश्चापि जग्मतुः ॥ २० ॥ कृत-

पूछवाथी ते श्रीषेण राजानी पुत्री बोली के, ॥ १५ ॥ हे स्वामी! पूर्वभवना वृत्तांतनीपेठे ए स्था-
ननी मने यादी नथी, त्यारे ते बोल्यो के त्यारे ज्योतिषीजमां श्रेष्ट एवा आ मारा मित्रने तुं पु-
छ? ॥ १६ ॥ अरिहंतना वचननीपेठे तेनुं ज्ञान जूठुं पडतुं नथी, अने तेथी ते तने जलदी घु-
घरी पडवानुं स्थान देखाडी आपशे. ॥ १७ ॥ एवी रीते तेनी शठबुद्धिथी ठगायेली ते बोली के
हे चतुर देवर! तुं कहे के मारी आ घुघरी क्यां पडी हती? ॥ १८ ॥ त्यारे ते पण कुमारनो अ-
भिप्राय जाणीने बोल्यो के, हे दक्षु! प्रभाते लग्नना उपदेशथी जाणीने हुं तने ते कहीश. ॥
॥ १९ ॥ एवी रीते ते सरल मनवाळी कनकवतीने विभ्रम उपजावीने गुणवर्मा तथा सागर बन्ने

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्नानाशनः सिद्धां—जनबन्नवपुर्निशि ॥ निशितासिकरस्तस्या । गुणवर्मागमद्गृहं ॥ २१ ॥ वत्र्त्र-
भेन विमानस्या—ध्यारोहं सह कृत्वरी ॥ सा प्राग्वदेव देवाधि—देवप्रासादमासदत् ॥ २२ ॥ स्ना-
त्रं कृत्वा यथास्थानं । खेचरौघे निषेदुषि ॥ एकाऽनृत्यत्प्रवीणा सा । पुनर्वीणामवादयत् ॥ २३ ॥
सभ्येषु वल्लकीनाद—स्वादतो मूर्छितेष्विव ॥ पपात वीणादंभांत—ताम्रितं तत्पादांगदं ॥ २४ ॥ अ-
ज्ञातं तत्तया नाद—लीनया कौरन्नोऽग्रहीत् ॥ ज्ञात्वा नाट्यावसाने तु । सा नेतुः संसदो जगौ

पोताने स्थानके गया. ॥ २० ॥ पछी ते स्नान तथा भोजन कर्याबाद सिद्धांजनथी अदृश्य थइने हाथमां सजेली तलवारसहित गुणवर्मा कुमार कनकवतीने घेर गयो. ॥ २१ ॥ पछी पोताना स्वामीसाथे विमानपर चडीने ते पूर्वनी पेठेज श्रीतीर्थंकर प्रभुना मंदिरमां गइ. ॥ २२ ॥ त्यां स्नात्रपूजा कर्याबाद खेचरोनो समुह योग्य स्थानके बेठाबाद एक नाचवा लागी, अने ते चतुर कनकवती वीणा वगाडवा लागी. ॥ २३ ॥ वीणानादना स्वादथी सभासदो मूर्छितनीपेठे होते छते वीणादंडना छेडाथी ठपकाएलुं तेणीना पगनुं झांझर पडी गयुं, ॥ २४ ॥ परंतु नादमां लीन थयेली कनकवतीना जाणवामां ते आव्युं नहि, अने गुणवर्मा कुमारे ते लेइ लीधुं. पछी नृत्य अ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ २५ ॥ गृहीतमद्य केनापि । मामकं नृप नूपुरं ॥ अनाथा इव मुष्यंते । तव दृष्टौ हहाबलाः ॥ २६ ॥ भ्रुकुटीभीष्मभालोऽथा—त्यधाद्विद्याधराधिपः ॥ अभूदभूतपूर्वा भो—श्चैत्यांतश्चौरिका कुतः ॥ २७ ॥ यस्य चैत्यालये चेत—श्चिनुते चौर्यचापलं ॥ सोऽचिरान्मे शलभतां । लभतां कोपपावके ॥ २८ ॥ गछ वत्सेधुना प्रात—स्त्वां करिष्ये प्रमोदिनीं ॥ इत्युक्त्वा प्रस्थितो विद्या—धरेशो विससर्ज तां ॥ २९ ॥ साथ प्राप समं भर्त्रा । निजं वेश्म विमानगा ॥ कुमारोऽप्येत्य धाम

इ रह्याबाद तेणीए ते जाएयुं, तथा सभापतिने पण ते वात तेणे जणावी के, ॥ २५ ॥ हे राजन्! आजे कोइए मारुं झांझर लेइ लीधुं छे, अने एवी रीते अरेरे! आपनी नजरे आ अबलाउ अनाथनीपेठे लुटाय छे. ॥ २६ ॥ हवे भ्रुकुटीथी भयंकर थयेलां ललाटवालो ते विद्याधरपति बोल्यो के अरे! आ जिनमंदिरनी अंदर अगाउ कदी पण न थयेली एवी चोरी क्यांथी थवा लागी? ॥ २७ ॥ आवी रीते जिनमंदिरमां पण जेनुं मन चोरी करवामां तत्पर थयुं छे ते तुरत मारा कोपरूपी अग्निमां पतंगपणुं पामो? ॥ २८ ॥ हे वत्स हमणा तो तुं जा? प्रभाते तने खुशी करीश, एवी रीते तेणीने विसर्जन करीने ते विद्याधरेंद्र चालतो थयो. ॥ २९ ॥ हवे ते

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

स्वं । निशाशेषमवाहयत् ॥ ३० ॥ प्रातः प्रदाय मित्राय । कुमारस्तत्पदांगदं ॥ गत्वा वध्वा गृहं स त्रा । तया रंतुं प्रचक्रमे ॥ ३१ ॥ सा न्यगादीदमी दूरे । मुच्यंतां देव देवनाः ॥ ह्यःपृष्टं किंकीणी वृत्तं । प्राग्मित्रेण प्रकाशय ॥ ३२ ॥ सोऽवदद्विदितं काम—विलग्ने लग्नतो मया ॥ किंचित्तवान्य दप्यस्ति । त्वस्तं सम्यग्विचिंतय ॥ ३३ ॥ ततः सा चकिताऽवोचत् । तत्किं वद जगाद सः ॥ यत्ते पादांबुजे धत्ते । हंसलीलां तदेव तत् ॥ ३४ ॥ प्रत्येमि किंकिणीवन्मे । तत्साक्षात् कुरुषे यदि ॥

---

कनकवती विमानमां बेशीने भर्तारसहित पोताने घेर गइ. तथा ते गुणवर्मा कुमारे पण पोताने घेर आवीने बाकीनी रात्रि निर्गमन करी. ॥ ३० ॥ प्रजाते मित्रने ते झांझर देइने, तथा कनकवतीने घेर जइने तेणीनीसाथे ते रमवा लाग्यो. ॥ ३१ ॥ त्यारे कनकवती बोली के हे स्वामी! आ पासाउने हमणां दूर मुको? अने गइ काले पूछेलुं घुघरीनुं वृत्तांत प्रथम मित्रमारफते कहेवरावो? ॥ ३२ ॥ त्यारे ते सागरमित्र बोल्यो के हे गजरायेली कनकवति! में लग्नथी जाण्युं छे के तारुं बीजुं पण कइंक खरी पडयुं छे. माटे बरोबर विचार? ॥ ३३ ॥ त्यारे तेणी चकित थइने बोली के ते शुं छे? ते कहे? त्यारे ते बोल्यो के जे तारां चरणकमलपर हंसनी लीलाने धारण

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तयेत्युक्ते कुमारस्य । मंजीरं मंत्रिसूर्ददौ ॥ ३५ ॥ कोऽस्ति ज्ञातोपनेता च । त्वदन्यो नष्टवस्तुनः ॥ एवमंतर्हसन् नृप—सुतः सुहृदमस्तुत ॥ ३६ ॥ तेन प्राभृतवत्पाणौ । नूपुरे पुरतो धृते ॥ मर्मविद्धेव सा बाला । भेजे कांचिच्चमत्कृतिं ॥ ३७ ॥ तवेदं स्यान्न वा सम्यक् । प्रत्यभिज्ञाय तत्प्रिये ॥ स्याच्चेत्तत्स्वपदस्पर्शात् । पुनीहीति जजल्प सः ॥ ३८ ॥ तदादायाथ साऽवादी—द्वो निमित्तज्ञ दे-

करे छे ते. ॥ ३४ ॥ जो घुघरीनीपेठे ते मने साक्षात देखाडो तो खातरी थाय, एम तेणीए कहेवाथी ते मंत्रिपुत्रे ते झांझर कुमारने आप्युं. ॥ ३५ ॥ अहो मित्र! ताराविना गयेली वस्तुने जाणनार तथा लावी आपनार वळी बीजो कोण छे? एवी रीते ते राजपुत्रे मनमां हसतां थकां पोताना मित्रनी प्रशंसा करी. ॥ ३६ ॥ हवे भेट आपवानीपेठे ते झांझर तेणे हाथमां आगाडी धारण कर्याथी ते कनकवती जाणे मर्मस्थानमां भेदाणी होय नहि तेम विचित्र चमत्कार पामी. ॥ ३७ ॥ त्यारे ते राजकुमार बोल्यो के हे प्रिये! आ झांझर तारुं छे के नहि? तेनी तुं बरोबर खातरी कर? अने जो ते तारुं होय तो तारा चरणना स्पर्शथी तेने पवित्र कर? ॥ ३८ ॥ पछी ते लेइने ते बोली के हे निमित्त जाणनार देवर! हजु तमो आ बन्ने आभूषणो पहेरवानुं स्थान

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वर ॥ किं भूषणोऽजयभ्रंश-स्तुवं नाद्यापि भाषसे ॥३९॥ ततो जगौ स गौरांगि । शृणु वच्मि स्फु
टाक्षरं ॥ तत्स्थानं दीप्तिमद् दूर—वर्त्ति मर्त्यैर्दुरासदं ॥ ४० ॥ मर्त्यैः दुरासदं तच्चेत् । तत्तत्र पतिते
इमे ॥ भूषणे कथमानैषी-रिति राजसुतावदत् ॥ ४१ ॥ स प्रोचे यस्य जातः श्री-गुणवर्मा गुणा-
लयः ॥ स्वामी सर्वकलाधाम । तस्य किं नाम दुर्घटं ॥ ४२ ॥ अविंदती गतिं कांचि—दरण्यपति-
तेव सा ॥ ततो व्यचिंतयद् बाला । करतल्पीकृताननना ॥ ४३ ॥ विद्यागम्यं क्व तत्स्थानं । क्व चे-

---

केम कहेता नथी? ॥ ३९ ॥ त्यारे ते सागरमित्र बोल्यो के हे गौर शरीरवाळी! हुं प्रकट रीते क-
हुं छुं ते सांभळ? ते तेजस्वी स्थान मनुष्यो ज्यां न जइ शके तेटलुं दूर रहेलुं छे. ॥ ४० ॥ त्यारे
राजकुमारी बोली के जो माणसो त्यां न जइ शके तो पछी त्यां पडेलां आ आभूषणो तमो के-
म लावी शक्या? ॥ ४१ ॥ त्यारे सागर बोल्यो के जेने माथे आवा महागुणवान अने सर्व क-
लाओना स्थानरूप गुणवर्मा जेवा स्वामी छे, तेने कयुं कार्य अघरुं थइ पडे तेम छे? ॥ ४२ ॥
हवे कंइ पण इलाज न मळवाथी जाणे ते कनकवती वनमां पडी होय नहि तेम हथेळीपर मु-
ख राखीने विचारवा लागी के, ॥ ४३ ॥ विद्यावडे जइ शकाय एवुं ते स्थान क्यां? अने आ पृ-

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

मौ व्यभिचारिणौ ॥ क तत्र भूषापतनं । क चानायं तदागमः ॥ ४४ ॥ किं न जानाम्यहं नैव । दैवज्ञः सैष सागरः ॥ अस्तु वाचस्तु दूरस्थं । कथमत्रानयेत्पुनः ॥ ४५ ॥ नूनं केनापि योगेन । तत्र संभाव्यते गतः ॥ स्वामी मे सात्विकः सत्व-वतां किं नाम दुर्घटं ॥ ४६ ॥ यदद्यश्वोऽयमायाति । प्रातरेवात्र सत्वरः ॥ अघ्राते इव निद्राया । दृश्ये अस्येक्षणे अपि ॥ ४७ ॥ ध्रुवमेकमतिभूय । भूयःशाठ्यनिधी इमौ ॥ दंभेनानेन मुग्धायाः । प्रवृत्तौ खेदनाय मे ॥ ४८ ॥ नृप नर्मन्युपूरा-

---

थ्वीपर चालनारा मनुष्यो क्यां? ते आभूषण पडवानुं स्थान क्यां? अने तेनुं आ अहीं आववुं क्यां? ॥४४॥ वळी आ सागर ज्योतिषी नथीज एम पण शुं हुं नथी जाणती? वळी तेसंबंधि कहेवुं तो दूर रह्युं, परंतु ते आभूषण अहीं ते केम लावी शके? ॥ ४५ ॥ माटे खरेखर कइंक प्रयोगथी मारो हिंमती स्वामी त्यां गयेलो संभवे छे, केमके हिंमतवानोने शुं मुश्केल छे? ॥ ४६ ॥ केमके आजकाल तो ते वळी प्रभातमांज जलदी अहिं आवे छे, तेम तेनी आंखो पण जाणे निद्राथी न धराणी होय नहि तेम घेरायेली देखाय छे. ॥ ४७ ॥ खरेखर अत्यंत लुच्चाइना भंडारसरखा तेओ बन्ने एकमत थइने आ कपटक्रियाथी मने मुग्धाने खेदित करवाने तत्पर थया छे.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्त—कंठयाथ तया जगे ॥ मां वंचयसि विश्वस्ता—माः किमेवं मृषोक्तिभिः ॥ ४९ ॥ अधरांतर-
जाताना—मन्यद्वाचां विचेष्टितं ॥ हार्दीनां तु भवेदन्य—देव लीलायितं पुनः ॥ ५० ॥ क्रीडामा-
त्रफलं नर्म । तव मर्माविधं मम ॥ कंडूययापि नागस्य । लतायाः प्रलयो न किं ॥ ५१ ॥ युवा-
मुभावहं त्वेका । युवां छेकावहं त्वृजुः ॥ युवां पुमांसावबला । त्वहं तत् किं प्रतिब्रुवे ॥ ५२॥ खे-
दितायां मयि प्रीति—र्यदि ते तत्तथा कुरु ॥ स्वामिन्नवाप्स्यसि क्रीमा—पात्रं क्व पुनरीदृशं ॥ ५३॥

॥ ४८ ॥ पछी क्रोधथी रुंधायेला कंठवाळी ते कनकवती कुमारप्रते बोली के, अरे स्वामी! मने विश्वासीने आवी रीतनां जूठां वचनोथी आप शामाटे ठगो छो? ॥ ४९ ॥ होठवच्चे उत्पन्न थयेली वाणीनी चेष्टा बीजा प्रकारनीज होय छे, अने हृदयना वचनोनी चेष्टा वळी तेथी भिन्नज होय छे. ॥ ५० ॥ आपने तो मारी आ मश्करीथी गम्मत थाय छे, परंतु मारां मर्मस्थानो भेदाय छे, केमके हाथीनी खरजथी पण शुं वेलमीनो नाश नथी थतो? ॥ ५१ ॥ तमो बे छो, हुं एकली छुं, तमो बन्ने हुशियार छो, हुं सरल छुं, तमो बन्ने पुरुषो छो, अने हुं तो अबळा छुं, माटे आपने हुं शुं जवाब आपुं? ॥ ५२ ॥ वळी हे स्वामी! मने खेदित करवाथीज जो आपने खुशी

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इत्यादिबाधितालापा-माश्वास्य वचनांतरैः ॥ वल्लभां सह मित्रेण । कुमारः स्वगृहं ययौ ॥ ५४ ॥
दाक्षिण्यात्प्रकटं वक्तु-मशक्तश्चापलं मम ॥ अज्ञापयत्प्रियो न्यंग्यं—तरेणायं धियां निधिः ॥ ५५ ॥
सत्या अपि ममासत्या । ही जातेयं कलंकिता ॥ संतापेनेति सा कष्टं । गमयामास वासरं ॥ ५६ ॥
॥ युग्मं ॥ रजन्यां राजसूर्गुप्त—गात्रः सिद्धांजनेन सः ॥ गत्वा पत्न्या गृहं कोण—देशमालंब्य
तस्थिवान् ॥ ५७ ॥ पर्यंकेऽथ विपर्यस्त—गात्रां मत्सीमिव स्थले ॥ जगाद यामिनीयामा-पगमे तां

---

थती होय तो तेम करो? केमके माराजेवुं गम्मतनुं पात्र आपने बीजुं क्यां मळशे? ॥ ५३ ॥
एवी रीते दुःखित वचनोवाळी पोतानी ते स्त्रीने बीजी रीते आश्वासना आपीने ते गुणवर्मा कु-
मार मित्रसहित पोताने घेर गयो. ॥ ५४ ॥ मारा महाबुद्धिवान भर्तारे फक्त दाक्षिणताने लीधे
मारुं आ उछांछळापणुं प्रगटरीते नहि कही शकवाथी मने जूदा प्रकारथीज जणावी दीधुं छे. ॥
॥ ५५ ॥ अरे हुं सती छतां पण मारापर असतीपणानुं कलंक आव्युं छे, एवी रीते संतापवडे
करीने तेणीए कष्टथी ते दिवस निर्गमन कर्यो. ॥ ५६ ॥ पछी रात्रिए ते गुणवर्मा कुमार सिद्धां-
जनथी अदृश्य शरीरवाळो थइ कनकवतीने घेर जइ एक खुणामां बेठो. ॥ ५७ ॥ हवे जमीन-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

प्रियंवदा ॥ ५८ ॥ यमुद्यममधार्षीः प्राग् । यियासुस्त्वं जिनालये ॥ किं सोऽद्य हारितो द्यूते । हृ-
तः केनापि वा सखि ॥ ५९ ॥ किं ज्वरः किं स्मरः किं वा । कोऽपि व्यतिकरः परः ॥ अद्यानूदं-
गतापाय । गतापायमिदं वद ॥ ६० ॥ न किं वेत्सि खगः कर्त्ता । विलंबेनाविलं मनः ॥ त्वरस्व
साऽवहेला-ऽवहेला खलु वैरिणी ॥ ६१ ॥ साथ निःश्वासलूकाग्नि—ग्लपयंत्योष्टपल्लवं ॥ बभाषे
सखि किं वच्मि । मंदभाग्यास्मि सर्वथा ॥ ६२ ॥ यतो बाल्येऽहमारूढा । मेरुशृंगमिवोन्नतं ॥ पितुः

पर जेम माछली तेम पलंगपर अस्तव्यस्त शरीरे पडेली ते कनकवतीप्रते रात्रिनो एक पहोर ग-
याबाद प्रियंवदा बोली के, ॥ ५८ ॥ हे सखि! पूर्वे जिनालयमां जवामाटे तुं जे उद्यम धारण
करती हती, ते उद्यमने शुं आजे जुगारमां हारी गइ छुं? के कोइए ते हरी लीधो छे? ॥५९॥
वळी आजे तारां आ शरीरने हेरान करनारो शुं तने ताप चड्यो छे? अथवा शुं कामातुर थइ
छुं? के कइं बीजी बाबत बनी छे? तुं सत्य कहे? ॥ ६० ॥ वळी तुं नथी जाणती के जो विलंब
थशे तो ते विद्याधरनुं मन क्रोधातुर थशे, माटे उतावळ कर? केमके तेनी अवगणना वैर क-
रावनारी थशे. ॥ ६१ ॥ हवे निःश्वासरूपी लूथी पोताना ओष्टपल्लवने सूकावतीथकी कनकवती बो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रासादमीद्दये स्म । खेटेनानेन खेऽटता ॥ ६३ ॥ मांसपेशीमिव श्येनः । स्तेनश्चैकावलीमिव ॥ हृ-
त्वा मुमोच मामेष । क्वाप्यरण्ये दवीयसि ॥ ६४ ॥ निर्मंतुमपि मां हंतु-मसौ कीनाशनिःकृपः ॥
कृपाणमाकृशन्नेव । कोशादेवमवोचत ॥ ६५ ॥ बाले मृगीव व्याघ्रेन । मया त्वमिह हन्यसे ॥ मृ-
त्योर्बिभेषि चेत्सद्य-स्तत्प्रपद्यस्व मे वचः ॥ ६६ ॥ उदीच्यां दूरतो यत्नात । कृतं रत्नमयं मया ॥
अस्ति श्रीमद्युगादीश-भवनं नेत्रपावनं ॥ ६७ ॥ मत्प्रेषितविमानेन । चैत्यमेत्य तदन्वहं ॥ त्वया

---

ली के हे सखि! हुं तने शुं कहुं? बिलकुल हुं मंदभाग्यवाळी छुं. ॥ ६२ ॥ केमके बाल्यपणामां
मारा पिताना मेरुशिखरजेवडा उंचा महेलपर ज्यारे हुं चडी हती त्यारे आकाशमां फरता आ
विद्याधरे मने दीठी. ॥ ६३ ॥ त्यारे बाजपक्षी जेम मांसनी पेशीने तथा चोर जेम एकावली हा-
रने तेम मने हरीने तेणे क्यांक दूर वनमां मेली. ॥ ६४ ॥ पछी ते यमसरखो निर्दय विद्याधर
निरपराधी एवी पण मने हणवामाटे मियानमांथी तलवार खेंचीने कहेवा लाग्यो के, ॥ ६५ ॥
हे बालिका! हाथी जेम हरिणीने तेम हुं तने अहीं मारी नाखीश, अने जो तुं मृत्युथी डरती
हो तो जलदी मारुं वचन स्वीकार? ॥ ६६ ॥ उत्तर दिशामां दूर में एक रत्नमय अने नेत्रोने प-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गौरांगि संगीतं । कार्यमर्द्धनिशागरे ॥ ६८ ॥ न कार्यं दारकर्मापि । ममादेशं विना त्वया ॥ इ-
ति तस्य वचो मेने । मया जीवितकाम्यया ॥ ६९ ॥ तदादि यामि यामिन्यां । तत्र नृत्याय नि-
त्यशः ॥ व्यधां तु भीतभीतैव । पाणिग्रहणमप्यहं ॥ ७० ॥ न तद्भिया मयाद्यापि । कौमारं सखि
खंड्यते ॥ उदंतोऽयमियत्कालं । गोपितः स्वपतेरपि ॥ ७१ ॥ भर्त्राद्य स्वयमेवेदं । विदांचक्रे क-

वित्र करनारुं श्रीमान् ऋषभदेवप्रभुनुं मंदिर यत्नपूर्वक बनाव्युं छे. ॥ ६७ ॥ माटे हे गौर शरीरवा-
ळी! में मोकलेलां विमानमां बेशीने तारे हमेशां मध्यरात्रिए ते जिनमंदिरमां आवीने संगीत
करवुं. ॥ ६८ ॥ वळी मारा हुकमविना तारे परणवुं पण नहि. त्यारे में पण जीववानी इच्छाथी ते-
नुं ते वचन कबुल कर्युं. ॥ ६९ ॥ अने त्यारथी हुं हमेशां रात्रिए त्यां नाचवामाटे जाउं छुं, त-
था आ विवाह पण में (तेनाथी) बीतां बीतांज कर्यो छे. ॥ ७० ॥ वळी हे सखि! ते विद्याध-
रना डरथी में हजु मारुं कुमारीपणुं पण खंडित कर्युं नथी तेम आटला वखतसुधी आ वृत्तांत में
मारा पतिथी पण गुप्त राख्यो छे ॥ ७१ ॥ परंतु आजे मारा स्वामीए ते वृत्तांत कोइपण रीते पो-
तानी मेळेज जाणी लीधो छे, केमके महात्माओनी बुद्धि दिव्य रत्नोपेठे सर्व जगोए पहोंची

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

थंचन ॥ धीर्दिव्यरथवत्सर्व-पथीना हि महात्मनां ॥ १२ ॥ मद्वृत्तमथमज्ञासीत । स्वदृशा चेन्न तद्दयं ॥ यदि चान्यगिराबोधि । शोधिस्तन्नाग्निनापि मे ॥ १३ ॥ जानन्नथ कथं नाथः । सोढा दैपथिकीमिति ॥ स्वैरिणीति धिया हन्या-न्मामप्येष कदाचन ॥ १४ ॥ भिंद्याद्विद्याधराधीशं । तत्र गत्वा कदाप्यसौ ॥ यद्वा कुर्यात्स एवास्य । दशां दुर्हृदभीप्सितां ॥ १५ ॥ अनया चिंतया तन्वि । जातास्मि भृशमाकुला ॥ कार्ये दैवस्य वश्येऽस्मिन् । न जाने किं भविष्यति ॥ १६ ॥ मृत्युर्मे पा-

---

वळे छे. ॥ १२ ॥ वळी आ मारा स्वामीए मारुं वृत्तांत जो पोतानी आंखोथी जोयुं होशे तो मने भय नथी, पण जो अन्यना कहेवाथी जाण्युं होशे, तो ते मारुं कलंक अग्निथी पण शुद्ध थइ शके तेम नथी. ॥ १३ ॥ वळी ते मारा स्वामी मने बे मार्गे चालनारी जाणीने केम सहन करशे? वळी आ स्वेछाचारी छे, एवी बुद्धि लावीने कदाच मने ते मारी पण नाखे. ॥ १४ ॥ वळी कदाचित् ते त्यां जइने ते विद्याधरपतिने पण मारी नाखे, अथवा ते विद्याधरज कदाच दुर्जनोने इछित एवी तेनी दुर्दशा करे. ॥ १५ ॥ एवी रीते हे तन्वि! हुं आ चिंताथी अत्यंत व्याकुल थइ छुं, अने आ दैवाधीन कार्यमां हवे शुं थशे? ते जाणी शकातुं नथी. ॥ १६ ॥ मारो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धम्मि-
सार्थं
२०७

णिना पत्युः । प्रत्युत प्रीतिकारणं ॥ पांसुलत्वापवादश्चे—न्मांसलत्वमियर्त्ति न ॥ ११ ॥ चकोरी निशि कोकी तु । दिवा जवति निर्वृता ॥ मया तु निर्वृतिः प्रापि । पापिन्या न दिवानिशं ॥१७॥ नलिनी निशि निद्राति । दिवा कैरविणी पुनः ॥ सुखं दिवा च रात्रौ च । न निद्रेयं मया सखि ॥ १७ ॥ एकतो जर्त्तरि प्रीति–रन्यतः खेचराद्भयं ॥ कियत्कालं सखि स्थेय—मीदृशे संकटे मया ॥ ७० ॥ तत्तवाद्य न यास्यामि । त्वयैव सखि गम्यतां ॥ यद्भाव्यं तद्भवत्वेव–मुक्त्वा तस्थौ नृ-

---

आ कुलटापणानो अपवाद जो विस्तार न पामे तो मारा पतिना हाथे मरवुं ते पण मने प्रीति करनारुं छे. ॥ ११ ॥ चकोरी रात्रिए तथा कोकी दिवसे पण निरांत मेलवी शके छे, परंतु मने पापणीने तो दिवसे के रात्रिए पण विश्राम मळतो नथी. ॥१७॥ कमलिनी रात्रिए सुए छे, तथा कैरविणी दिवसे सुए छे, परंतु हे सखि! मने तो दिवसे के रात्रिए पण सुखे निद्रा मलती नथी. ॥ १७ ॥ एक बाजुथी मने स्वामिप्रते प्रीति छे, अने बीजी बाजुथी मने ते विद्याधरनो जय छे, माटे हे सखि! आवा संकटमां ते मारे हवे केटलोक वखत रहेवुं! ॥ ७० ॥ माटे आज तो हुं त्यां नहि जउं, अने तुं ज जा? जे थवानुं होय ते थाउ? एम कहीने कनकवती त्यांज र-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पांगजा ॥ ८१ ॥

कुमारश्चारवङ्गन्न—प्रचारोऽथ व्यचिंतयत् ॥ निपीयास्या इमा वाचो । हृदयं स्फुटतीव मे ॥ ॥ ८२ ॥ एका पाणिगृहीतीयं । स्नेहला साप्यनारतं ॥ पराधीनतया दुःखं । धत्ते धिग्मम पौरुषं ॥ ८३ ॥ बध्वा तदद्य विद्वेषी । वध्य एव स खेचरः ॥ वध्वाश्च प्रीतिरुत्पाद्या—ऽब्जिन्या इव तमःक्षये ॥ ८४ ॥ आरूढा तत्क्षणायाते । विमानेऽथ प्रियंवदा ॥ अन्वारोह्य कुमारोऽपि । प्रचचा-

---

ही. ॥ ८१ ॥

छुपी पोलीसनीपेठे त्यां गुप्त रहेलो गुणवर्मा कुमार हवे विचारवा लाग्यो के मारी प्रियाना आ वचनो सांभलीने तो मारुं हृदय जाणे फाटी जाय छे. ॥८२॥ एक तो आ मारी परणेली स्त्री छे. अने तेमां पण वली अत्यंत स्नेहवालो छे, अने ते ज्यारे पराधीनपणाथी दुःख सहन करे छे, त्यारे मारा पुरुषपणाने धिक्कार छे. ॥ ८३ ॥ माटे आज तो ते मारा शत्रु विद्याधरने मारे बांधीने मारवोज जोइये, अने अंधकारनो नाश थवाथी जेम कमलिनीने तेम मारे आ मारी स्त्रीने प्रीति उपजाववी जोइये. ॥ ८४ ॥ हवे तत्क्षण आवेलां ते विमानमां प्रियंवदा चढी बेठी, अने गुणव-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्त नभोऽध्वना ॥ ८५ ॥ उपचैत्यं विमानेऽस्मि-न्नवतीर्य स्वयं स्थिते ॥ युग्मिनाविव संपृक्तौ । ज-ग्मतुस्तौ जिनालयं ॥ ८६ ॥ चिरं प्रतीक्ष्य कनक-वतीं सूरिक्षपात्यये ॥ तावत्खेचरचक्रेशः । स्नात्रं चक्रे जिनेशितुः ॥ ८७ ॥ नाट्यं विनापि निर्गच्छ—न्नसौ नाभेयमंदिरात् ॥ द्वार एव निरैक्षिष्ट । प्रविशंतीं प्रियंवदां ॥ ८८ ॥ सोऽपृच्छन्मत्सरी किं रे । स्वामिनी न तवागता ॥ इयानस्याः प्रमादः किं । मयि शास्तरि जीवति ॥ ८९ ॥ तस्याः शिरोऽर्त्तिरस्तीति । मंदमुक्ते तया भिया ॥ एषा मृ-

र्गो कुमार पण तेनी पाछळ तेमां चमीने आकाशमार्गे चालवा लाग्यो. ॥ ८५ ॥ पछी ते जिन-मंदिरपासे ते विमान पोतानी मेळेज उतरीने स्थिर थये छते युगलीयांनीपेठे जोमायेला ते ब-न्ने जिनालयमां गया. ॥ ८६ ॥ घणो वखत कनकवतीनी राह जोइने घणी रात्रि गयाबाद ते खे-चरेश्वरे प्रभुनुं स्नात्र कर्युं. ॥ ८७ ॥ पछी नृत्यविनाज श्रीआदिनाथप्रभुना मंदिरमांथी बहार नि-कळता ते विद्याधरे बारणामांज प्रवेश करती प्रियंवदाने जोइ. ॥ ८८ ॥ त्यारे ते मत्सरी विद्या-धरे तेणीने पूछ्युं के अरे! आजे तारी शेठाणी केम आवी नहि? हुं उपरी छतां तेणीनो आ-टलो प्रमाद शुं जीवी शकशे? ॥ ८९ ॥ त्यारे डरथी प्रियंवदाए धीमेथी तेणीनुं आज माथुं दु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

षोक्तिरेवेति । विपश्चिन्निश्चिकाय सः ॥ ८१ ॥ पश्चादुल्लाघयिष्यामि । लघु तां शस्त्रकर्मणा ॥ प्रथमं दर्शयिष्यामि । तत्र कैतववाक्फलं ॥ ८२ ॥ इत्युक्त्वा तां गले धृत्वा । क्रंदंतीं कुररीमिव ॥ स्मरेष्टदेवतामेवं । जिघांसुर्निजगाद सः ॥ ८३ ॥ साप्यवादीदहो खेट । ज्ञातमेतदभूत्पुरा ॥ संगतेस्ते यमस्येव । भवितायतिरीदृशी ॥ ८४ ॥ उल्लंघितभवारण्यः । कारुण्यरससागरः ॥ शरण्यः शरणं पूर्व—मयमेव जिनोऽस्तु मे ॥ ८५ ॥ पेष्टुं कंकतवल्लिप्ताः । परोलक्षानरीनलं ॥ शरणं गु-

---

खे छे एम कहेते छते ते हुशियार विद्याधरे निश्चय कर्यो के खरेखर आ तेणीनुं जूठुं बहानुं छे. ॥ ८१ ॥ ते कनकवतीने तो हुं पाछळथी तुरत शस्त्रवडे हलकी करीश, हमणा तो प्रथम तारां कपटी वचननुं फल तने देखाडीश. ॥ ८२ ॥ एम कहीने आक्रंद करती कुररीनीपेठे तेणीने गळामांथी पकडीने मारवानी इछावाळो ते विद्याधर कहेवा लाग्यो के तारा इष्ट देवनुं स्मरण कर? ॥ ८३ ॥ त्यारे ते पण बोली के अरे खेचर! अमोए प्रथमथीज जाण्युं हतुं के यमसरखो जे तुं तेनी सोबतथी आवुंज परिणाम आवशे. ॥ ८४ ॥ उळंगेल छे संसाररूपी वन जेणे तथा करुणारसना समुद्रसरखा एवा आ जिनेश्वरज प्रथम मने शरणरूप थाओ? ॥ ८५ ॥ पछी कां-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

णवर्मा मे । ततो मत्स्वामिनीपतिः ॥ ७६ ॥ अथो तदभिधासीधु—पानप्रविलसन्मदः ॥ नृकीटो मत्पुरः कोऽय—मित्युच्चैर्गर्जितोर्जितः ॥ ७७ ॥ उल्लालयन् खड्गशुंडां । त्रासयन्नखिलान् खगान् ॥ यावल्लुतावन्मृद्गाति । तां स खेचरकुंजरः ॥ ७८ ॥ परप्राणहरीं खड्ग—चपेटां व्योम्नि वल्गयन् ॥ सहसाविरभूत्तावत् । कुमारः केसरीव सः ॥ ७९ ॥ त्रिभिर्विशेषकं ॥ वाचालयन्नसौ शैला—नभि-

---

कसी जेम लींबोने तेम लाखोगमे शत्रुओने मारवाने जे समर्थ छे, एवो मारी शेठाणीनो स्वामी गुणवर्मा मने शरणरूप थाओ? ॥ ७६ ॥ हवे ते गुणवर्मानां नामरूपी मदिराना पानथी मदोन्मत्त थयेलो ते विद्याधर मोटे स्वरेथी गर्जारव करवा लाग्यो के अरे! ते मनुष्यरूपी कीडो वळी मारी आगळ शुं हिसाबमां छे? ॥ ७७ ॥ पछी ते विद्याधररूपी हाथी पोतानी तलवाररूपी सुंढने उछाळतोथको तथा सर्व खेचरोने त्रास आपतोथको जेवामां तेणीने वेलडीनीपेठे कचरी नाखवानी तैयारी करे छे, तेवामां ॥ ७८ ॥ शत्रुना प्राण हरनारी खड्गरूपी थप्पडने आकाशमां उछाळतोथको ते गुणवर्मा कुमार केसरी सिंहनीपेठे एकदम प्रगट थयो. ॥ ७९ ॥ घणा पडघाओवडे करीने पर्वतोने वाचाळ करतोथको वैरिपक्षने भय करनारुं सिंहनादसरखुं वचन बोलवा ला-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तैः प्रतिशब्दितैः ॥ वाचं क्ष्वेडामिवादत्त । वैरिपक्षभयंकरीं ॥ १४०० ॥ रे पाप कठिनालाप । भी-
रुत्रापक तापक ॥ वीरमानिन्निमां मुंच । बालां मम पुरो भव ॥ १ ॥ ग्रस्यते बलिना हीन—बलः
कुलकलंकिना ॥ अयमारण्यको न्याय—स्त्वया चैत्येऽवतारितः ॥ २ ॥ मा मंस्था यज्जिनार्चा मे
। भविता विघ्नशांतये ॥ कृतं ह्यविधिना पुण्यं । प्रत्युतानर्थकृद्भवेत् ॥ ३ ॥ यथा गुणकरं वैद्यो—पदे-
शात्कृतमौषधं ॥ यथा गुरूपदेशेन । स्मृतो मंत्रः फलप्रदः ॥ ५ ॥ यथा कृषिः कृता काले । एव

---

ग्यो के, ॥ १४०० ॥ अरे! पापी! कठोरवचनी! बीकणने मरावनारा! ताप आपनारा! तथा सु-
भटनो डोळ राखनारा! आ बालिकाने छोडीने मारा सामो आव? ॥ १ ॥ कुळमां कलंकभूत ब-
लवान निर्बलने ग्रसी जाय छे, एवो आ जंगली न्याय तें अहिं जिनमंदिरमां उतार्यो छे. ॥ २ ॥
वळी एम पण तुं नहि मानजे के आ जिनपूजा मारां विघ्नो शांत करशे, केमके अविधिथी क-
रेलुं पुण्य पण उलटुं अनर्थोने करनारुं छे. ॥ ३ ॥ वळी वैद्यना उपदेशथी करेलुं औषध जेम
गुणकारी थाय छे, तथा गुरुना उपदेशथी यांद करेलो मंत्र जेम फल आपनारो थाय छे, ॥५॥
तथा अवसरेज करेली खेती जेम धान्यनी वृद्धि करनारी थाय छे, तेम धर्म पण गुरुनी आज्ञा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

शस्यस्य वृद्धये ॥ तथा फलति धर्मोऽपि । काले गुर्वाज्ञया कृतः ॥ ६ ॥ निशि देवार्चनं बाला—
कृष्टिस्तद्भोगविघ्नता ॥ इत्यादिपंकशुद्धिर्मत्—खड्गधाराजलेऽस्तु ते ॥ ७ ॥ पादाहतोऽथ भोगीव ।
क्रोधांधः खेचरेश्वरः ॥ मुक्त्वा स्त्रियमुदस्तासिः । कुमारं प्रत्यधावत ॥ ८ ॥ पतनोत्पतनव्यग्रौ । क्ष
णं कंदुकलीलया ॥ संयुक्तौ च वियुक्तौ च । कांस्यतालाविव क्षणं ॥ ९ ॥ मल्लाविव क्रमन्यासैः ।
कंपयंतौ क्षणं क्षमां ॥ कुमारखचरेंद्रौ तौ । युयुधाते मिथश्चिरं ॥ १० ॥ युग्मं ॥ क्षणं पुरः क्षणं

पूर्वक अवसरे करेलो फले छे. ॥ ६ ॥ रात्रिए देवपूजा, कुमारीकाउनुं पकडवुं, तेउना भोगोमां विघ्न करवुं, इत्यादिक तारा ( कादवनी ) पापोनी शुद्धि मारा खड्गधारारूपी जलमां थाउ ? ॥७॥ हवे पगेथी हणेला सर्पनीपेठे ते क्रोधांध विद्याधर ते स्त्रीने छोडी तलवार उगामीने कुमारप्रते दोड्यो. ॥ ८ ॥ पछी क्षणवार दडानीपेठे तेउ बन्ने उछळवा तथा नीचे आववा लाग्या, तथा कांसीआउनीपेठे क्षणवार जोडावा तथा विखुटा पडवा लाग्या. ॥ ९ ॥ वळी मल्लनीपेठे चरण-न्यासोथी क्षणसुधी पृथ्वीने कंपावताथका ते कुमार अने विद्याधर बन्ने घणा वखतसुधि परस्पर युद्ध करवा लाग्या. ॥ १० ॥ एक एवा पण ते राजपुत्रने क्षणमां आगल, क्षणमां पाछल, क्षण

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पश्चात् । क्षणं व्योम्नि क्षणं क्षितौ ॥ वीक्षांचक्रे खगेनैको—ऽप्यनेक इव रूपभृः ॥ ११ ॥ विस्मयाद्वीक्षितो व्योम—वर्त्तिव्यंतरखेचरैः ॥ कुमारोऽवसरं प्राप्य । मौलिं तस्यासिनाऽलुनात् ॥ १२ ॥ विजय वीरावतंसेति । वादिनस्तस्य मूर्द्धनि ॥ ववृषुः कुसुमस्तोमं । यशो मूर्त्तमिवामराः ॥ १३ ॥ बिभतः खेचरान् विश्वान् । समाश्वास्य मृदुक्तिभिः ॥ स तत्र क्षणमासित्वा—ऽपनिन्ये समरश्रमं ॥ ॥ १४ ॥ हरिण्यः पाशनिर्मुक्ता । इव माद्यन्मुदस्तदा ॥ अन्यनंदन्नृपसुता—स्तिस्रोऽपि समुपेत्य

---

मां आकाशमां अने क्षणमां पृथ्वीपर एम अनेक प्रकारे ते विद्याधर जोवा लाग्यो. ॥ ११ ॥ आकाशमां रहेला व्यंतर अने विद्याधरोवडे आश्चर्यपूर्वक जोवाएला ते गुणवर्मा कुमारे अवसर मेलवीने तलवारथी ते विद्याधरनुं मस्तक कापी नाख्युं. ॥ १२ ॥ हे वीरशिरोमणि! तुं जय पाम? एम कहेताथका देवो तेना मस्तकपर मूर्तिवंत यशसरखो पुष्पोनो समूह वरसाववा लाग्या. ॥१३॥ पछी सघला भय पामता विद्याधरोने मिष्ट वचनोथी आश्वासन आपीने तेणे त्यां क्षणवार रहीने संग्रामनो थाक दूर कर्यो. ॥ १४ ॥ पछी पाशमांथी मुक्त थयेली हरिणीओनीपेठे अत्यंत हर्षित थयेली ते त्रणे राजपुत्रीओ पण त्यां कुमारपासे आवीने तेनी स्तुति करवा लागी. ॥ १५ ॥ (ब-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तं ॥ १५ ॥ वयं तिस्रोऽपि नृपाल—बालिकास्त्वद्वधूरिव ॥ नीत्वा मृत्युदशामत्र । नाट्यमेतेन का-
रिताः ॥ १६ ॥ पाणिग्रहणमप्यस्य । वाक्पाशपतिता वयं ॥ नाकार्ष्म कीदृशी बंदी—कृतस्त्रीणां सु-
खस्पृहा ॥ १७ ॥ अस्मान् मोचयता धीमन् । किं नादीयत नस्त्वया ॥ अथ स्वस्थानकं यामः ।
सौम्य यद्यनुमन्यसे ॥ १८ ॥ ततस्तदाज्ञया तासु । प्रस्थितासु यथागतं ॥ प्रियंवदान्वितोऽध्यास्त ।
स्वं विमानं नृपांगजः ॥ १९ ॥ तेन प्राप्तनभःपारः । स्वपुरं पुरुषार्थवित ॥ गत्वा सत्वाधिको मंक्षु ।

---

ळी तेउ बोली के ) अमो त्रणे तमारी स्त्रीनीपेठे राजपुत्रीउ छीये, तथा ते विद्याधरे मरणदशा-
ने पहोंचामीने अहीं अमोने नचावी छे. ॥ १६ ॥ वळी तेना वचनरूपी पाशमां पमवाथी अमोए
